Chap-5

# पञ्चमो परिच्छेदः

## क-रसनिष्पत्तिविषयकानां विविधानामाचार्याणाम् सिद्धान्तः-----

रससिद्धान्तस्योचितं मूल्यमंकयितुं तस्य यथार्थस्यार्थस्यगतिरपेक्ष्यते। रसस्वरूपनिरूपणप्रसंगे विशदतया..भारतीये काव्यशास्त्रे रसशब्दस्य त्रयोऽर्थाः प्रचलन्तीति। वस्तुपरकोऽर्थः, यत्र रसः काव्यगतो भवति. अर्थात स शब्दार्थमाध्यमेन कवेः सर्जनात्मकभावनायाः कलात्मिकाभिव्यक्तिर्भवति ..स कविभावनायाः कल्पनया जीवनगतानुभूतिसर्जनप्रवृत्ताया भावनायाः शब्दमूर्तिरूपं भवति, सुगमशब्देष्विदं भावाश्रितं काव्यसौन्दर्यम्। भावपरकोऽर्थः...यत्र रसः सहृदयहृदये तिष्ठति...नानाभावमयेन काव्येन सहृदयहृदये उद्बुद्धासुखदुःखमयी रागात्मिका चेतनाऽस्ति। आनन्दपरकोऽर्थः अत्रापि रसः सहृदयगत एव, काव्यमननोद्बुद्धयं पुरः स्फुरति। रसे रागतत्वस्य प्राधान्यमस्ति, रागात्मकतैवरससारः, किन्तु कलातत्वस्यापि तत्र महत्वमन्यूनम्। भरतसम्मते वस्तुपरकेऽर्थे तु तन्महत्वं सुस्पष्टमेव, व्यक्तिपरकेऽर्थेऽपि तावदास्वादस्य प्रमुखंसाधनं कलात्वमेव। भट्टनायकाभिमतो भावकत्वव्यापारो वस्तुतः कलातत्वमेव योऽभिनवेनापि शबदभेदेन साधारणीकरणप्रक्रियायाः पूर्वार्धे यथावदंगीकृतः एवं रसकल्पना स्वकीये मूलरूप एव काव्यातत्व स्योचितं महत्वं प्रददाति, वस्तुतस्तमनिवार्यमेव मन्यते, यतो विभावादिसाधारणीकरणं बिना भावस्य रसे परिणतिरेवन सम्भवति। अतो लक्षणानुसारेणैव रसपरिधौ भावतत्वेन साकं कल्पना तत्वंतयोः प्रयोजयित्र्याः कविप्रज्ञायाः प्रकल्पनायां बुद्धितत्वस्याप्युचितः समावेशोऽस्ति।

रसशास्त्रानुसारेण रागतत्वस्य सीमन्यपि रसस्वरूपमतिव्यापकं विद्यते। शास्त्रे रसपरिधौ रसरसाभासयोः भावभावाभासयोः भावोदयभावशान्त्योः, भावसन्धि भावशवलतयोश्च निर्भ्रान्ततया समावेशः क्रियते। अत्र रसपदेन विभावानुभावव्यभिचारिद्वारा परिपुष्टस्य स्थायिनो निर्विघ्नाप्रतीतिरभिप्रेयते। रसशब्दः परिपाकावस्थावाचकः इत्यर्थः।

क्वचिद्रस्य कश्चिदेकोऽनेको वावयवो न स्फुटमुल्लिख्यते,परं तत्र तस्याध्याहारः क्रियते, सहृदयकल्पना हि स्वयमेव तमाक्षिपति

परिपाकावस्थामेव द्योतयति। परं तत्र प्रतीतिर्निर्विघ्ना न भवति। मनोवैज्ञानिक्या नैतिक्या वा कयाचिदपि वाधया तत्र प्रतीतिर्यत्किञ्चिद् बाध्यत एव, दूष्यत एव वा। रसाभासस्य रसपरिधावन्तर्भावो द्योतयति यन्नैतिव मूल्यैः परिपुष्टोऽपि रससिद्धान्तस्तैः परिबद्धो न भवति। स मानवभावनां प्रमाणयति, न नियमान्.... स रूढिभिश्च स्वभावादेव मुक्तो भवतीति। भावो हि नाम रसस्यापुष्टावस्था। अपुष्टः स्थायी पुष्टो वा व्यभिचारी भाव इत्युच्यते। उभयत्र तत्र परिपाको न भवति। भावाभासश्च भावस्य बाधिता अपूर्णा वा प्रतीतिः। अस्यापि रसान्तर्गततया स्वीकृतेरिदं तात्पर्यम्.... यत् काव्यस्य सरसताया आधारो वस्तुतस्तु भावस्य.... विभावानुभावादिभिस्तत्परिपोषणे रसप्रतीतिरतिस्पष्टा भवति, अपरिपोषणेऽपि तत्र रसवत्ता न प्रतिषिध्यते, स्थायिनो व्यभिचारिणोऽपि वा सफलाभिव्यक्तिरपि नूनं रसात्मिकैव भवति। भावोदय..... भावशान्तिभावसन्धिभिरिद तथ्यं परिपुष्यते यद्भावस्य सूक्ष्मतरा अवस्था अपि रसप्रतीयतेऽलम्भवितुमर्हति। भावशबलतायाः कस्यचिदेकस्य भावस्य सीानेऽकेषां भावानां तन्त्रं भावशबलताया रसकोटौ परिगणनमाधुनिकस्यालोचनाशास्त्रस्यास्याः प्रचलन्त्या धारणायाः पूर्वाभासोऽस्ति यत् काव्यानुभूतिः कस्यचिदेकस्य भावस्यानुभूतिर्नास्ति, नाप्येकात्मिकानुभूतिः अपि त्वनेकानुभूतितन्त्रात्मिका सेति।अन्यत्र गुणा अपि रसधर्मतिया स्वीक्रियन्ते, चित्तस्य द्रुतिदीप्तिविकासा अपि अर्थाच्चित्तस्यैतादृशाविकासा अपि येषां स्वरूपं सर्वथा न स्पष्टीभवति, रसपरिधावायन्ति। इत्थं रसो वैव्यापकः शब्दः तेन विभावानुभावव्यभिचारिसंयुक्तः स्थायी....परिपाकावस्थैव नाभि धीयते। प्रत्युत तस्मिन् काव्यगतायाः समग्राया अपि भावसम्पदोऽन्तर्भावो भवति। अपारिभाषिकरूपेण स काव्यगतभावसौन्दर्यपर्यायः शब्दार्थगतचमत्कारमाध्यमेन भावास्वादः, भावभूमिकायां वा शब्दर्थसौन्दर्यास्वाद एव वस्तुतो रसः। काव्यानुचिलन्तसम्प्राप्तरागात्मकानुभुतिसर्वरूपप्रकाराः सूक्ष्मस्थूलौ, सरलजटिलौ, क्षणिकस्थायिनौ, संवेदनस्पर्शी, चित्तविकारभावबिम्बौ, संस्कारमनोदशे, शीलादयश्च सर्वेऽपि रसपरिधावाविशन्ति।

अतः स्वकीये वास्तविके रूपे रसस्य स्थितिर्मनोमये कोश एव माननीया स आत्मानन्दपर्यायो नास्ति। प्राथमिकी कल्पना तु वस्तुपरकैवासीत्, रससिद्धान्तप्रवर्तकस्य भरतस्य दृष्ट्या रसः पदार्थोऽस्ति इति। पदार्थः इति तत्प्रश्नात् लोल्लटशंकुकान्तं तस्येदमेव स्वरूपं मान्यमभूत्। भट्टनायकेन रसं ब्रह्मानन्दसहोदरं मन्यमानेनापि तस्य पदार्थत्वं सर्वथा न प्रतिषिद्धम्। आम् अभिनवेन शैवाद्वैतस्यानन्दकल्पनायां सर्वथा निमज्ज्य स गाढेनाध्यात्मिकरागेण रञ्जितः, अयं रागोऽनन्तरमपि प्रावर्तत।

परमभिनवेनाप्यसावात्मानन्दाद्भिन्न एवाकलितः। तथापि तस्मिन्नात्मानन्दस्वीकृतिरुपलभ्यते तस्या इदमेव कारणं यथाऽभिनवस्य दार्शनिकमतानुसरिणस्त्वानन्दमात्रकल्पनाऽऽमानन्दसन्दर्भ एव सम्भवति। अत्र लौकिकालौकिकयोरानन्दयोः कोऽपि पारमार्थिकोभेदोनास्त्येव।रसनिष्पत्तिः किल भारतीयकाव्यशास्त्रस्य महत्वातिशयपूर्णो विषयः। वस्तुतो रसविवेचनमत्र रसनिष्पत्यैवोपक्राम्यते, भरतेन हि मूलतो न रसस्वरूपम्, अपि तु रसनिष्पत्तिरेव व्याख्याता....

'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।' इति।1

अत्र सूत्रे संयोगनिष्पत्तिशब्दयोरर्थो न स्पष्टः, एतावेव चाधिकृत्य परवर्तिष्वा चार्येषु गहनः शास्त्रार्थः प्रवृत्तः। भरतेन स्वयं निष्पत्तिपदार्थस्तावदित्थं व्याख्यातः..

'यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति, यथाहि गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो निर्वर्त्यन्ते, तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति।

अत्र प्रथमोपवाक्ये रसनिष्पत्तिरिति, द्वितीये रसाः निर्वर्त्यन्त इति, तृतीये च रसत्वमाप्नुवन्तीति तिस्रः परस्परसम्बद्धाः क्रियाः प्रयुक्ताः। एतासामाधारेण..'निर्मितिभवनस्वरूपप्राप्तयो निष्पत्तिपदार्था भवन्ति। इमे सामान्या अपारिभाषिकाः कोशार्थाः.... निस्+पद्(गतौ+क्तिन् निःशेषरूपेण स्थितिप्राप्तिकरणम्, स्थितिप्राप्तिभावः अस्तित्वप्राप्तिः...सिद्धिः।

संयोगशब्दार्थमपि विशदयता भरतेनोल्लिखितम्।

'यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषाहर्षादींश्चाधिगछन्ति तथा नानाभावाभिनयव्यञ्जितान् वागंगसत्वोपेतान् स्थायिभावानास्वादयन्ति सुमनाः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति। इति। एतदुद्धरणाधारेण स्थायिभावैः सह सम्यग्योगः संगमः इति संयोगपदार्थः। दृष्टान्तगताभ्याम् उपगतोपेतशब्दाभ्यामप्यस्यैवार्थस्य पुष्टिर्भवति। इदंदृष्टान्तानुसारेण....

यथा द्रव्यव्यञ्जनौषधीनामन्नेन संयोगात् षाडवादयो भोज्यरसा निर्वर्त्यन्ते, तथा विभावानुभावव्यभिचारिभावेन संयोगान्नाट्यरसाः निर्वर्त्यतन्ते, सिद्ध्यन्ति वा। अतो रससूत्रस्य स्वयं भरताभिमतोऽर्थः.. विभावानुभावव्यभिचारिभावानां स्थायिभावेन सह संयोगात्संगर्माद् वा रससिद्धिर्भवतीति भवति। आधारभूतं तु तत्वं स्थायिभावः, यदा सविभावादिभिः संयुज्जते तदा रसः सिद्ध्यति ।संयोगार्थोऽत्र संसर्गः। निष्पत्तिपदार्थो द्विविधः..उत्पत्ति अभावे भावकल्पना, निर्मितिश्च। भरतेन यद्यपि रसप्रसंगेऽस्मिन् उत्पत्तिशब्दः पौनः पुन्येन प्रयुक्तः किन्तु दृष्टान्तेन

स्पष्टमिदं यदयमुत्पत्तिशब्दः औपचारिक एवास्ति, न त्वभावे भावसर्जनार्थकः। विद्यमानोपकरणसंयोगेन नवरूपरचना निर्मितिपदार्थः। आधारभूतानामुपकरणानां परिणतित्वेऽपि तद्भिन्नेयं भवति। रसनिष्पत्तिपदस्यायमेवार्थो भरतस्याभिमतः। न खलु रसः कश्चिदीदृशो नूतनः पदार्थः, यस्य सर्वथा प्रागभावः स्यात्। तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति वचनस्यायमर्थो यद् विभावाद्युपगतः स्थायिभाव एव रसो भवतीति। रसः स्थायिभावाद्भिन्नोऽन्नात्षाडवादिरसवत्। तदाधारस्तु स्थाय्येव। यो रसत्वे परिणमति। अतो रसरूपेण कस्यचिन्नूतनपदार्थस्य सृष्टिर्न भवति। विद्यमानः स्थायिभावरूपः पदार्थ एवोपकरणान्तरसहयोगेन नवीनं रूपं धत्ते। नूतन सृष्टिरिति न नूतनपदार्थः। अपि तु संस्कारादिक्रियाणा व्यञ्जनादिपदार्थानाञ्च संयोगेन नवरूपप्राप्तिरेव सा। दृष्टान्ताधारेण भरतसम्मतोऽयमेव निष्पत्तिपदार्थः सिद्ध्यति। षाडवादयो रसा निर्वर्त्यन्ते इत्यत्र निर्वर्त्यन्ते इत्यस्य निर्मिता भवन्तीति। स्पष्टोऽर्थः।

## 1-उत्पत्तिवादः

विभावानुभावादि योगादनुकार्ये रामादौ रस उत्पद्यते। अनुभावास्तमुत्पन्नरसं बोधयन्ति व्यभिचारिभावास्तं परिपोषयन्ति। अतः स्थायिभावेन सह विभावानामुत्पाद्योत्पादकभावसम्बन्धः, अनुभावानां तैः सह गम्यगमकभावसम्बन्धो, व्यभिचारिणां तैः सह पोष्यपोषकभावसम्बन्धो भवति। 'संयोग' इत्येतस्य शब्दस्यातस्त्रयोऽर्थाः इमे-उत्पाद्योत्पादकभावसम्बन्धः, गम्यगमकभावसम्बन्धो, व्याभिचारिणां तैः सह पोष्यपोषकभावसम्बन्धो भवति। 'संयोग' इत्येतस्य शब्दस्यातस्त्रयोऽर्थाः इमे—उत्पाद्योत्पादकभावसम्बन्धः, गम्यगमकभावसम्बन्धः, पोष्यपोषकभावसम्बन्धश्च।

भट्टलोल्लटकृतेयं व्याख्या मीमांसासिद्धान्तमूलकेति व्याह्रियते।

परिवर्तिनि काव्यशास्त्रेऽस्य मौलिकस्य भरतसूत्रस्य नानाव्याख्यानविवेचनान्यारभ्यन्त, रससिद्धन्तश्च क्रमशो विकसायमानं जातम्। भरतसूत्रव्याख्यातृषु प्रथमं नाम भट्टलोल्लटस्य स्मर्यते। लोल्लटस्यापि ग्रन्थो नोपलभ्यते। सर्वतः प्रथमं रसविषयकस्य तन्मतस्योद्धरणान्यभिनयगुप्तग्रन्थेऽभिनवभारतीनामके, केचिदल्लेखाश्च तदीयः एव ध्वन्यालोकलोचने प्राप्यन्ते। एतान्युद्धरणान्यतिसंक्षिप्तानि, अभिनवेन स्वदृशा प्रस्तुतानि, अत एवेमानि नितान्तमपर्याप्ततया सह सन्दिग्धप्रामाण्यानि सन्ति।

तथापि लोल्लटमतस्याधारोऽद्यावधीमान्युद्धरणान्येव विद्यन्ते। तदितरो द्वितीय आधारो मम्मटप्रणीते काव्यप्रकाशे समुद्धृतं लोल्लटमन्तव्यमपि वर्तते यदतिसंक्षिप्तम्, अभिनवभारतीसमुद्धृततन्मन्तव्यतः किञ्चिद् भिन्नञ्च। अत्रद्वे सम्भावने स्तः.. तत्र प्रथमा मम्मटेनापि लोल्लटग्रन्थो दृष्टः स्यात्, तदाधारेण चोक्तं मन्तव्यमुद्धृतं स्यादिति। द्वितीया तु मम्मटोद्धरणाधारोऽप्यभिनवगुप्तग्रन्थयोस्तद्विषयकोद्धरणान्येव स्युः। परं स्वसमयावधि विकसितस्य रससिद्धान्तस्य प्रकाशे तेनाभिनवव्याख्यायां किञ्चन संशोधनं विहितं स्यात्। समस्तपरिस्थितिपर्यालोचनेन द्वितीयैव सम्भावना ग्राह्यत्वेन प्रतीयते। परवर्तिभिराचार्यैः सर्वैरपि प्रायो मम्मटवक्तव्यमेव पुनरावर्तितम्।

एनामत्यल्पां सामग्रीमाधृत्य लोल्लटमतं व्याख्येयं विवेच्यञ्च।

अभिनवभारत्याम्....

अत्र भट्टलोल्लटप्रभृतयस्तावदेवं व्याचख्युः..विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिः। तत्र विभावश्चित्तवृत्तेः स्थाय्यात्मिकायाः कारणम्। अनुभावाश्च न रसजन्या अत्र विवक्षिताः, तेषां रसकारणत्वेन गणनानर्हत्वात। अपितु भावानामेतेऽनुभावाः।व्यभिचारिणश्च चित्तवृत्यात्मकत्वाद्यद्यपि न सहभाविनः स्थायिना, तथापि वासनात्मनेह तस्य विवक्षिताः। दृष्टान्तेऽपि व्यञ्जनादिमध्ये कस्यचिद् वासनात्मकता स्थायिवत्, अन्यस्याद्भूतता व्यभिचारिवत्। तेन स्थाय्येव विभानुभावादिभिरुपचितो रसः। स्थायी त्वनुपचितः। स चोभयोरपि, मुख्यया वृत्तया रामादावनुकार्ये, अनुकर्तरि च नटे रामादिरूपतानुसन्धानबलादिति।

ध्वन्यालोकलोचने...

'तथाहि पूर्वावस्थायां यः स्थायी स एव व्यभिचारिसम्पातादिना प्राप्तपरि पोषोऽनुकार्यगत एव रसः। नाट्ये तु प्रयुज्यमानत्वान्नाट्यरस' इति केचित्।

यद्यप्यत्र लोल्लटनाम नोक्तम्, तथाप्येतत्तन्मतमेवेत्यन्दिग्धम्। बालप्रियाख्यटीकया हि सन्देहः सद्य एव निवार्यते।

मम्मटोद्धृतं लोल्लटमतम्....

'विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणै रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः, व्यभिचारिभिर्निर्वेदादिभिः... सहकारिभिरुपचितो मुख्यया वृत्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः।'2

एषामुद्धरणानामाधारेण भट्टलोल्लटमन्तव्यविषये तथ्यानीमानि लभ्यन्ते...

संयोगपदार्थो भरताभिमत एव। स्थायिभावेन सह संयोग इत्यर्थः।
स्थायिभावाश्रयोऽनुकार्यो रामादिः।

सीताद्यालम्बनानि तं स्थायिभावं अनुकार्यस्यैव चित्ते जनयन्ति। अत्र प्रसंगे उत्पत्तिरिति, उद्भूततेति च शब्दौ प्रयुक्तौ, यदाधारेण मम्मटो 'जनित' इति शब्दं प्रायुङ्क्त। अथैष प्रश्नः उदेति यदत्रोत्पत्तिपदार्थो वस्तुतः 'अभावे भावस्य कल्पना' इत्यस्ति, उद्बुद्धिमात्रमेति। यदि कस्यचिद्वासनात्मकता स्थायि' इति लोल्लटमतांशो नाभिनवटिप्पणी, तदा त्वयं केवलः शाब्दिको विवादः। यदा स्थायिभावो वासनात्मकतया विद्यते विभावश्च तमुद्बोधयतयेव, तदा तूद्बुद्धावभिव्यक्तौ च नास्ति कोऽपि भेदः। परमियमभिनवटिप्पणी चेत्तदोत्पत्तेराधारोऽसत्कार्यवाद एव माननीयः स्यात्।अनुभावपदार्थोऽपि न रसजन्याःचेष्टाः, अर्थाच्छंगाररसमग्नस्य रामस्य चेष्टा नानुभावः, अपि तु भावानुवर्तिनो विकारा एवानुभावः। अनुपचितस्थायिभावस्य व्यभिचारिभावानामप्यनुवर्तिनो न तूपचितस्थायिभावस्य। उपचितस्थायिभावो रसः, अतस्तदनुवर्तिनो विकारास्तु कार्याण्येव स्युर्न कारणानि। अनुपचितस्थायिभावानां संचारिणाञ्चानुवर्तिनो विकारास्तु स्थायिभावोपचयकारणानि भवन्ति। डाक्टरकान्तिचन्द्रपाण्डेयेन3 ततो गृहीतप्रेरणेन डाक्टरप्रेमस्वरूपगुप्तेन च भावानाम् इत्यस्य 'विभावनाम्' इत्यर्थः कृतः। अर्थाद् आलम्बनस्य। अनुभावस्त एव, ये आश्रयरूपानुकार्यानुभूतरसकारणानि भवन्ति।4 यद्यपि भरतस्य शब्दावल्यां भावे विभावोऽप्यन्तर्भवति, तथाप्यत्रैतादृशार्थ विशेषोपस्थापनमनपेक्षितम्। यद्ययमेवार्थोऽभीष्टोऽभविष्यत् तर्ह्यभिनवगुप्त एव स्वयमिदं कथन्न स्पष्टीकरिष्यत्। एतद्विपरीतं च मम्मटेन 'तेषां रसकारणत्वेन गणनानर्हत्वाद्' इत्युपेक्ष्यैते स्पष्टं स्थायिभावकार्यतया निरूपिताः। व्यभिचारिणः स्थायिसहभाविनो भवन्ति। किन्तु 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगम' इत्यनुसारेण मनसि युगपच्चेतनाद्वयं न सम्भवतीति नियमेन सीायिनां व्यभिचारिणां च सहभावः कथं शक्यते मन्तुम्? इतीयं शंका 'व्यभिचारिणः संस्काररूपेण स्थायिना सह भवन्ति न युगपत्स्थितिरूपेणेति समाधीयते। यदि च स्थायिनो वासनात्मकताविषया धारणा स्वीक्रियेत, तथापि द्वयोः सहभावः सिद्ध्यति। स्थायिनो वासनातमतया सञ्चारिणां चोद्बुद्धतयोद्भूततया वा स्थितेः सम्भवात्।रसो मूलतो मुख्यतया चानुकार्यगतो भवति गौणरूपेणानुसन्धानबलान्नटगतोऽपि। अभिनवोद्धृतायां वाक्यावल्यामनुसन्धानकर्ता नट एव, अनुसन्धानबलात्तस्मिन्नपि रस उत्पद्यते। इत्यत्रानुसन्धानशब्दो व्याख्यामपेक्षते। अनुसन्धानपदस्य संस्कृतसाहित्याचार्यैरनेकेऽर्थाः प्रस्तूयन्ते.आरोपः, अभिमानः, योजनञ्चेति।

एतेषामाधारेणाभिनवोद्धृते वाक्ये 'आरोप' इत्यर्थः स्यात्। नटस्य स्वस्मिन् रामत्वाद्यारोपः। अभिमानः इत्यस्य नटस्य तत्कालं रामादिमानित्वम्, योजनमित्यस्य योजनेत्यस्य वा 'पूर्वं योऽहं नटोऽभवम्,'स एवाहमधुना रामोऽस्मि' इत्यशुद्धानुसन्धानम्, ततः परञ्च रामोऽहम्' इति शुद्धानुसन्धानमित्यर्थः। एषु त्रिष्वप्यर्थेषु स्थूलदृशा नास्त्यन्तरविशेषः। सूक्ष्मदृशा तु विचार्यमाणेषु स्फुटीभवतीदमन्तरम्। दार्शनिकशब्दावलीगहनेऽनिपत्य सामान्येन वयमेतदवयामो यदिमे त्रयोऽपि शब्दास्तादात्म्ये मात्रभेदं द्योतयन्ति। 'आरोपे' तादात्म्यबाह्यता, 'अभिमाने' तादात्म्यान्तरिकता, शैवदर्शनस्य कदाचिदशुद्धानुसन्धानपर्यन्तास्य गतिः। 'योजने, तादात्म्यपूर्णता, शैवदर्शनस्य शुद्धानुसन्धानकोटिपर्यन्तास्य गतिः। डाक्टरकान्तिचन्द्रपाण्डेयेन लोल्लटं शैवपण्डितं मन्यमानेन तृतीयमतमेव स्थापितम्। लोल्लटस्य वस्तुतः किं विवक्षितम्। स्थापना च कियन्मान्येति निर्णेतुं प्रामाणिकाधारो नोपलभ्यते। तथापि भारतीयनाट्यकलासूक्ष्माध्ययने व्याख्यानमिदमतिरोचकं महत्वशालि चास्तीति न सन्देहः। अतएवात्रेदं समासतः समुद्धृतम्।

मम्मटेनोपर्युक्तमुद्धरणं किञ्चिद्भिन्नियेत्थं प्रस्तुतम्..

'तद्रूपतानुसन्धानान्नर्तकेऽपि .प्रतीयमानो रसः' इति।

रामाद्यनुकार्यस्वरूपानुसन्धानान्नटे प्रतीयमानः स्थायीभावो रसो भवतीत्यर्थः। एतेनैतत्सिद्ध्यति यन्नटे रसप्रतीतिर्भवति सामाजिकस्य। कदाचिदस्यानुसन्धानस्य कर्ताऽपि सामाजिक एवास्ति (यद्यप्यनुसन्धानसंगतिरत्रनटेऽपि सम्भवति) त्रिभिरमीभिरर्थविकल्पैरनुसन्धानस्य सामाजिकपरतवेऽर्था इत्थं संगस्यन्ते......

सामाजिको नटे राममारोप्य तत्र रामगतस्य रसस्य प्रतीतिं प्राप्नोति। आरोपशब्देन व्यज्यते यत्सामाजिकचेतसि नटत्वचेतना न लुप्यते..तस्येदं ज्ञानं न्यूनाधिकमवशिष्यत एव यदयं नटोऽस्ति, यो रामरूपेण व्यवहरतीति।

सामाजिको नटं राममभिमन्य रामगतस्य प्रतीतिर्लभते। अयमाशयः सामाजिकमनसि तत्क्षणं नटे रामभावनोत्पद्यते। रंगकौशलप्रवञ्चनया स तत्कालं नटस्य वास्तविकं रूपं विस्मृत्य तस्मिन् रामप्रतीतिं श्रयते। अभिमानशब्दो व्यञ्जयति यन्नटवास्तविकरूपविस्मृतिपूर्वकतद्गतरामभावनेयं भ्रन्तिरेव, या नाट्यकलाचमत्कारेण तत्कालं समुत्पन्नास्ति इयं यद्यपि मिथ्याप्रतीतिः, तथाप्येनां विना सामाजिकस्य नटे नायकगतरसप्रतीत्यसम्भवात्तस्य नाट्यरसेन सह कश्चिदपि सम्बन्धः स्थापयितुं न शक्यते। (अस्ति चैष सम्बन्धः)...

अनुसन्धानशब्दस्य योजनार्थो न सिद्ध्यति।यतो 'नट एव रामः' इतीदृशे शुद्धानुसन्धाने सञ्जाते नटगतो रसः प्रतीयमानो न स्यादपि तु सिद्ध एव स्यात्। इदञ्चोद्धरणं 'रसस्य प्रतीयमानतायामेवाधृतवैशिष्ट्यम्।

एतत्तथ्याधारेणं लोल्लटस्य रसधारणा कल्पयितुं पुनः प्रयतितुं शक्यते। अत्र प्रसंगे प्रथमं तावदिदं स्पष्टम्, यत्तस्य दृक्कोणो यथार्थवादी वस्तुपरकश्र्च विद्यते, नात्मवादी नापि व्यक्तिपरक इति। अनया चैतिहासिक्या च दृष्ट्याभिनवगुप्तोद्धरणान्येव प्रामाणिकतराणि मन्येरन्, मम्मटसंशोधनानि परवर्तिनामात्मवादिनां रसकल्पनाया एव फलानि।

लोल्लटानुसारेण लोकजीवने कण्वाश्रमस्य रामणीयकभृति पार्श्वभूमौ जगदेकसुन्दर्याः शकुन्तलायाः साक्षात्कारेण दुष्यन्तस्य चित्ते सहसा रतिभावः समुत्पन्नः। (रतिभावोऽयं यद्यपि दुष्यन्तचित्ते वासनात्मतयाऽऽविद्यत, परमद्य शकुन्तलासम्पर्केणैव तदुदयः, अतोऽस्यात्पत्तिरेव माननीया) आलम्बनरूपायाः शकुन्तलाया अनिन्द्येन लावण्येन, आवर्जकेन च व्यवहारेण वनप्रदेशस्य तस्यां रमणीयभूमिकायाम्(उद्दीपन विभावेन) आश्रयरूपस्य दुष्यन्तस्य चित्तेऽयं स्थायी रतिभावोऽधिकमुद्दीप्यत। दुष्यन्तस्यांगान्यस्पन्दन्त, रोमाञ्चेन शरीरं पुलकितम् (अनुभावेन) एकतः शकुन्तलारूपलावण्येन तच्चित्ते हर्षः समुदरिच्यत, अपरतश्र्च वरणीयतादिप्रश्नेन चिन्तादयो (व्यभिचारिभावाः) विनायासं समचरन्, एतैश्र्च रतिभावोऽपुष्यतैव, नाक्षीयत। इत्थं दुश्यन्ताश्रयहृदये शकुन्तलालम्बनेन जनितो रतिस्थायिभावः, शकुन्तलाहावभाववातावरणरमणीयतादिप्रभावेणोद्दीपितः, दुष्यन्तपुलकरोमाञ्चादिभिरनुभावतिः, हर्षचिन्तादिभिर्व्यभिचारिभावैः परिपोषितः। अनया च प्रक्रियाया तस्य स्थायिभावस्य पूर्णः परिपाकोऽभवत्, स च रसो निष्पन्नः।

'लोकवृत्तानुकृतिर्नाट्यम्' इत्यनुसारेण नाट्येऽयं प्रसंगोऽन्वक्रियत। नटो दुष्यन्तस्य, नटी च शकुन्तलाया रूपमधारयत्, आश्रमपार्श्वभूमिर्यवनिकायां प्रादर्श्यत।नटः स्वशिक्षाभ्यासाभ्यां दुष्यन्तस्याभिमानं योजनां (साधुशब्देषु) तेन सह तादात्म्यमकरोत्, तद्वच्च व्यवहारत्, यथा स स्वयमेव दुष्यन्तोऽस्ति, तत्समक्षं विद्यमाना नटी च शकुन्तलास्ति यां दृष्ट्वा तस्य चेतसि रतिभाव उद्भूतः, शरीरे रोमाञ्चाद्युदयः, मनसि च हर्षचिन्तादभिावसंचारो जातः। इत्थं सर्वापि सामग्र संगमञ्चेऽप्युपस्थिता। स्थायिभावः, विभावाः, अनुभावाः, व्यभिचारिभावाश्च। अतोऽत्रापि स्थायिभावो विभावादुद्भूयः, अनुभावैरभिव्यज्य, व्यभिचारिभिश्च परिपुष्य रसत्वे परिणतः। प्रसंगो वास्तविकः परश्र्च कलात्मकानुकरणरूप इत्येवानयोरन्तरम्। अतः प्रथमे प्रसंगे वास्तविकस्य दुष्यन्तस्य चित्ते यस्य रसस्य निष्पत्तिरभूत, स मुख्यः। नाट्यप्रसंगे च नटस्य चित्तेयस्य रसस्य निष्पत्तिर्भवति, स गौणः। अभिनवसाक्ष्येण लोल्लटस्य कदाचिदेतदेवाभिमासीत्, अस्य गुणदोषौ स्यातां नामस्याभिमतस्य विषये प्रथमोऽयं प्रश्नः समुदेति यदस्य रसस्य सामाजिकेन

सह कः सम्बन्धः? सामाजिको नटगतं रसं नाट्यरसं वा साक्षात्कृत्य चमत्कृतो भवतीति तदुत्तरम्। अस्य चमत्कारस्याधारो वाह्यसौन्दर्यमात्रम् (वातावरणवेशभूषानुभावादिसफलाभिनयमात्रं) नास्ति, अपि त्वस्याधारः स्थायिभाव एव। स एवोपचितो रसत्वं प्रतिपद्यते। अतो नायं चमत्कारः कुतूहलजन्यमनोरञ्जनमात्रम्, अपि तु रागात्मिकानुभूतिः। लोल्लटोद्धारणे तथ्यमिदमभिधया नोक्तम्, परं व्यञ्जनया सर्वथा गम्यम्। रसस्य हि सार्थकताऽनु- कार्यानुकर्तृपर्यन्तसीमिता न शक्यते मानयितुम्। यदा समग्रस्यापि नाट्यप्रपञ्चस्यायोजनमेव सामाजिकस्य कृते वर्तते। तदास्य नाट्यप्रपञ्चस्य सार्थकतापि तमन्तरा न सिद्ध्यति। सामाजिकचमत्कारणेनैवास्यापि सार्थकतेति स्वतः सिद्धं व्यावहारिकं तथ्यम्, एतस्य कृते तर्कशास्त्रदर्शनं वा नापेक्ष्यते। भरतस्यापीदमेव मतम्, तदेवाश्रित्य लोल्लटप्रवृत्तिः।

अपरश्चायं प्रश्नः...को नामानुकार्यपदार्थ इति। मूलतः ऐतिहासिको रामादिः कविनिबद्धो वा? मूलत ऐतिहासिको रामादिरिति लोल्लटः। कविनिबद्धस्यहि रामादेश्चित्ते रत्यादिभावोद्भूतेः प्रश्नोऽपिनोदेति। परं कुत्रास्तिमूलपात्रा- णामसितत्वम्, नटस्तानि कथमनुकरिष्यति, नटस्तु वस्तुतः कविनिबद्धान्येव पात्राणि लोकज्ञानव्यक्तिगतानुभ- वयोराधारेणानुकरोति? वस्तुपरकदृष्टित्वाल्लोल्लटो मूलपात्रेषु कविनिबद्धेषु च तेषु भेदं कर्तुं नापारयदित्येवास्य प्रश्नस्योत्तरम्। मूलपात्रात् काव्यनाट्योः पात्रं कविभावनासंसर्गवशादवश्यं न्यूनाधिकतया भिद्यते, इति रहस्यं तेन नावगतम्। अतस्तन्मनसि शंकापि नोदिता, यद्रामाद्यनुकरणं कथं सम्भवति? इति।

मूलरसस्थितेरनुकार्यगतत्वमाननस्यायमाशयः..मूलरसास्वादो ह्यैतिहासिकेन रामादिनैव कृतः, व्यक्तिगतानुभवत्वात्स प्रत्यक्षो लौकिक ऐन्द्रियो मानसिकश्चानुभव एवासीत्। गौणरसस्थितेरनुकर्तगतत्वमाननेऽप्ययमर्थ, अनुकर्तापि रत्यादिस्थायिभावपरिपाकरूपं रसमनुभवति किन्त्वसौ तस्य स्वरत्यादिभावपरिपाकस्य साक्षादनुभवो नास्ति प्रत्युत परानुभवस्य कल्पनात्मकः समानुभव एव। अतो मूलरसधारणा (अनुकार्यगतरसधारणा) यथा वर्तमानरसधारणातो भिद्यते तथा यदवध्यशुद्धाऽप्यस्ति। गौणरसधारणा तु (अनुकर्तृगतरसधारणा) प्राचीनानेकाचार्यमतभिन्नापि, आधुनिकसौन्दर्यशास्त्रमतानुकूलास्ति।

भरतस्येव लोल्लटस्यापि दृष्टिर्वस्तुपरकास्ति, सोऽपि सहृदयस्य दृष्ट्या रसमास्वादममत्वाऽऽस्वाद्यमेव मनुते। सहृदयस्य नाट्यास्वादो न रसः, रसस्थितिस्तु नाटकस्य मूलपात्रे नट एवास्ति यं सहृदयोनुभवति। भरतवच्च लोल्लटोऽपि मन्यते यत्स्थायिभाव एव विभावानुभावादिसहयोगेन रसत्वे

परिणमतीति।

'नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्ति। इति भरतः।

'तेन स्थाय्येव विभावानुभावादिभिरुपचितो रसः' इति लोल्लटः।

इहानयोर्भावानां वास्तविकार्थविषये भेदो जायते। भरतमतेन भावानां स्थायिभावविभानुभावव्यभिचारिणां.....सत्तापि वस्तुगतैवास्ति। अमी सर्वेऽपि भावभेदाः मूलपात्रस्य नटस्य, सामाजिकस्येति कस्याश्चिदपि व्यक्तेः प्रत्यक्षानुभवा न भवन्ति। अपितु सामान्यभावाः भावसम्बन्धिन्यो मनोवैज्ञानिकधारणा आधुनिकालोचनाशास्त्रशब्दावल्यां निर्वैयक्तिका भावा एव भवन्ति। कविर्नटश्चैव स्वस्वोपकरणमाध्यमेन प्रतिभालोकज्ञानशिक्षाभ्यासादिना व्यवस्थाविशेषानुसारेणैतान् प्रस्तूय नाट्यरसं सृजतः। लोल्लटस्येयं स्थितिः कदाचिदभिमता नाभूत्। यथाऽऽधुनिकानामनेकेषामा- लोचकानां निर्वैयक्तिकभावस्थितिर्नाभिमता। अतोऽसौ स्वबुद्धिविवेकेनैतां स्पष्टीकर्तुं प्रायतत। सरलया च विचारप्रक्रियया स्थायिभावस्य प्रत्यक्षसम्बन्धं मूलपात्रेण सह परोक्षसम्बन्धञ्चानुकर्त्रा नटेन सहातिष्ठिपत्। (स कविना सहापि भावसम्बन्धं स्थापयितुं) कविं प्रत्यपि गन्तुं प्राभवत्, भरतग्रन्थे तस्य प्रमाणमस्ति..'कवेरन्तर्गतं भावं भावयन् भाव उच्यते। इति। परं तं प्रति कदाचित् स नावहितः। इत्थं रसस्य नाट्यापेक्षयाऽनुकार्यानुक- र्त्रोर्व्यक्तयोः स्थितिमाननाद्..रसस्यानुभूतिरूपाभिमानात्... भावप्रधानायाकलात्मकस्थितेः स्थाने रसस्यैव मनोभावत्वाभिमानात्..भरताल्लोल्लटस्य दृष्टिर्नूनंव्यक्तिपरकतरा, भावपरकतरा चाभूत्। किन्तु सहृदयस्य कृतेऽद्यापि सा वस्तुपरकैवास्ति, लोल्लटकल्पितो हि रसः सहृदयस्य कृते स्वास्वाद्य एवास्ति। सहृदयस्य स्वकीयमास्वादं लोल्लटो रसं न मन्यते, अपि तु रसपरिणामम्। भरतलोल्लटयो रसकल्पनाया इमावेव सूक्ष्मौ भेदाभेदो स्तः। विवेचनमूलोल्लटाभिमतस्य (अनुमानिताभिमतस्य वा) सीमानः संस्कृतकाव्यशास्त्रे सविस्तरं विवेचिताः परं तस्य शक्तिः केनापि प्राचीनाचार्येण नोल्लिखिता।

प्रथमं तावदियं विशिष्टतास्य मतस्य यदिदं भरतसूत्रव्याख्यासु मूले सन्निहिततमम्।

रसस्यानुकार्यगतत्वाभिमाने चायमाशयः यत्काव्यनाट्यसौन्दर्यं प्रत्यक्षतो मूलपात्रभावैः सह सम्बद्धम्। किंच मूलपात्रगतैर्भावैस्तत्प्रेरितैश्च कार्यैरेव काव्यनाट्ययोविषयवस्तु निर्मीयते। अतः सिद्ध्यतीदम् यत्काव्यस्य नाट्यस्य वा मूलसौन्दर्यं तदीये विषयवस्तुनि निहितं भवति। इत्थं प्रकारान्तरेण लोल्लटः कलायां वस्तुमहत्त्वं सीपयति, अयञ्च सिद्धान्तो नानामतवादेषु विद्यमानेष्वपि नोपेक्षणीयः। विश्वसाहित्यस्यानेकेषां प्राचीननवीनानामाचार्याणां

मान्यतानेनाधिगतास्ति।

रसस्य व्यक्तिपरकत्वस्यंव्याख्यायाः सूत्रपातोऽस्मादेवाभवत्। कलात्मकस्थितेरग्रे सृत्वा रसो मनः स्थितिं यावत्प्रविंशति, यद्यपीयं मनःस्थितिः सहृदयस्य नास्ति, तथापि व्यक्तिसतात्र सर्वथा स्पष्टैव।

अभिनेतुश्चैव रसानुभूतिमुद्घोष्य लोल्लटेन नाट्यकलाविकासे नूतनावर्तो नियोजितः। अभिनयकलाप्रसंगेऽनुसन्धानकियया अनुसन्धानं स्वतो महती सिद्धिरासीत्। अनेन नाट्यकलायाः सूक्ष्मेऽध्ययनेऽत्यन्तमुपयोगीनि सूत्राणि प्राप्यन्ते

संस्कृतकाव्यशास्त्रे लोल्लटमतस्य दोषाः सर्वविदिताः सन्ति। अभिनवभारत्यनुसारेण शंककुकेन लोल्लटविरोधेऽष्टावाक्षेपाः कृताः..

1. 'विभावाद्ययोगे सीयिनो लिंगाभावेनावगत्यनुपपत्तेः। 2. भावानां पूर्वमभिधेयताप्रसंगात्। 3. स्थितिदशायां लक्षणान्तरवैयर्थ्यात्। 4. मन्दतरतममाध्यस्थयाद्यानन्त्यापत्ते।
5. हास्यरसे षोढात्वाभावप्राप्तेः। 6. कामावस्थासु दशस्वसंख्य रसभावादिप्रसंगात्। 7. शोकस्य प्रथमं तीव्रत्वं कालात् तनुमान्द्यदर्शनम्। 8. क्रोधोत्साहरतीनाममर्षस्थैर्यसेवाविर्यये हासदर्शनमिति विपर्ययस्य दृश्यमानत्वाच्च।' इति।

एषु तर्केषु प्रथमे षट् स्थायिभावरसयोरैक्यं सीयुयेव रसः इति प्रतिषेधन्ति। अन्तिमौ च स्थायिभावस्योपचितिं सीयुयेवोपचितो रसः इति निषेधतः। तत्र प्रथमानां षण्णां तर्काणामयं सारांश यदिह स्थायिभावानामस्तित्वं विभ्मावादिसंयोगात्पूर्वकेवलं विचारगतमेव भवति। तेषां ज्ञातमात्रं सम्भवति, न तु साक्षात्कारत्मिका वा प्रतीतिः। अतो विभावादिसंयोगात्तु वस्तुतः स्थायी भावः स्वस्वरुपमेव प्राप्नोति तरस रुपम्। किञ्च स्थायिभावेषु तारतम्यमपि भवति, तेषांमनुभूतौ च मात्राभेदेनान्तरं स्यात्, रसे तु तारतम्यकल्पना न संगच्छते, अतोऽसिद्धमेव तयोरैकात्म्यम्। शिष्टायोश्चैव तर्कयोरयमाशयः स्थायिभावस्य न सर्वत्रोपचयः शोकस्य तावत्स्वभावादेवोपचयो भवति, भवति त्वपचयः। पर क्रोधात्साहरतिभावानां परिपोषकसामग्र्यभावेऽपिचयो जायते। अतः स्थायिभाव उपचितः सन् रसो भवतीति स्थापना, उपचिते सन्दिग्धतया न सिद्ध्यति।

शङ्कुकस्येमे चाक्षेपाः सर्वथा मान्या न सन्ति। स्थायिभाव एव रसत्वे परिणमतीति सिद्धान्तस्तावदुपक्रमादन्तं यावन्मान्य एव। भरतस्येदं मतमासीत् ततश्चैव परवर्तिभी रसवादिभिरपि यथावदयं स्वीकृतः। स्थायिभावार्थविषय एव किञ्चिदन्तरमासीत्। भरतस्य तावद्व्यक्तिगतः स्थायिभावोऽभिप्रेत आसीत्, परमभिनवादीनां सहृदयगतः

[library stamp]

स्थायिभावोऽभिमतोऽभूत्। लोल्लटस्तु तद्‌द्वयभिन्नमेवार्थमकरोत्.. अनुकार्यगतः स्थायिभाव इति। अनकार्यविषये च मूलपात्रकविनिबद्धपात्रयोर्भेदं स्फुटीकर्तुं नापारयत्। तद्विवेचनस्य दुर्बलतमोऽयमेवांशः, तत एव च तन्मतखण्डनमुपाक्राम्यत।

अस्माद् दोषाद् दोषान्तरमेकं प्रभवति, स चायम्..यद्रसस्थितिः प्रत्यक्षेन्द्रियमानसिकभावाभिन्ना, तदनुसारेण सुखदुःखात्मिका च जायते यन्नं मान्यम्।

एतेन विवेचनेन निम्नांकिता निष्कर्षाः प्राप्यन्ते। 1. लोल्लटानुसारेणोपचितिरेव निष्पत्तिपदार्थः, स्थायिनो ह्युपचितावस्थैव रसः।इयमुपचितिरेका मिश्रप्रक्रियाऽस्ति, तत्र हि विभावानुभावव्यभिचारिणामपि योगो भवति। (क) विभावैः स्थायिभावा उद्‌बुध्यन्ते, इयमुद्‌बुद्धिरुत्पत्तिपदवाच्यापि भवति। अरूपस्य रूपदानञ्चात्रोत्पत्तिपदार्थः, नत्वभावे भावकल्पना। स्थायिभावो वासनात्मतया स्थितत्वात् शब्दाभिधेय एवासीत्, नासीत्तस्य साक्षात्कारात्मिका प्रतीतिः। विभावैरेवायं रसनात्मकं स्वरूपमापन्नः (ख) अनुभावैस्तस्य स्थायिभावस्य प्रतीतिर्भवति, मम्मटेनदं सर्वथा स्फुटीकृतम् परमभिनवधृतोद्धरणेऽप्यस्यास्ति निश्चिवतः संकेतः। (ग) व्यभिचारिभिः स पोष्यते। इत्थमुपचितिप्रक्रियायामुद्‌बुद्धेरुत्पत्तेर्वा, प्रतीतेः पुष्टेश्चेति तिसृणां क्रियाणां प्रारम्भे प्रायः क्रमिको योगोऽस्ति, अन्ते च तिस्रोऽप्येताः समवेता उपचितिप्रक्रियां निष्पादयन्ति। वस्तुतो भरतस्य, तत्सन्निहिततमस्य लोल्लटस्य च दृष्टौ षाडवादिरसनिर्माणप्रक्रिया प्रत्यतिष्ठत्। यथा निमित्तनिस्यूतस्य पदार्थविशेषस्य द्रवोऽन्यैर्द्र व्यैरोषधिमिश्रिव मिश्रणेन षाडवादिरसो भवति, एवमेव विभावोद्‌भूतः स्थायिभावोऽनुभावैर्व्यभिचारिभावैश्चव मिश्रितः (पोषितः) सन् नाट्यरसो भवति। अतो निर्मितिरिति निष्पत्तपदार्थः। उत्पत्तिशब्दस्त्वत्र केवलमस्मिन्नेवार्थे प्रवोक्तुं शक्यते यद्रसस्य स्थायिभावो विभावाद्युपचितः सन्नेकं नवीनं रूपं श्रयते, रसरूपेण कश्चिवदभूतः पदार्थो नोद्‌भवति।

निष्पत्तिपदार्थे स्पष्टीभूते संयोगपदार्थनिश्चयः सुकरो भवति, संयोगस्येह साक्षादर्थो विभावादिभिः सह स्थायिभावस्य संयोगः.... 'विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनिष्पत्तिः, इति। इमे हि विभावादयः स्थायिभावमुपचित्य रसरूपे परिणमयन्ति। अतो विभावादय उपचायकाः, स्थायिभावश्चोपचेयः, इत्थं स्थायिभावविभावयोरुपचेयोपचायकभावसम्बन्धः। इत्थमत्रं संयोगपदार्थो भवति उपचेयोपचायकभावसम्बन्धः इति। यथा मया पूर्वस्मिन्ननुच्छेदे स्फुटीकृतम्, यदुपचयो वोपचितिर्वा संयुक्तप्रक्रियास्ति,या खलूत्पत्तिप्रतीतिपुष्टिभिरति तिसृभिः

क्रियाभिरंगभूताभिः समेत्य सिध्यति, विभावेभ्यः स्थायिभावस्योत्पत्तिः, अतो विभावैः सहास्योत्पाद्योत्पादकभावसम्बन्धः, अनुभावैस्तस्य प्रतीतिर्भवति, ततोऽनुभावैः सहास्य गम्यगमकभावसम्बन्धः, व्यभिचारिभावैश्चवास्य पुष्टिर्भवति, तस्माद् व्यभिचारिभिः सहास्य पोष्यपोषकभावसम्बन्धोऽस्ति। इत्थमुपचेयोपचायकभावसम्बन्धः.....
उत्पाद्योत्पादक+गम्यगमक+पोष्यपोषकभाव...सम्बन्धानां समवायोऽस्ति। सूत्रमभूत्...

लोल्लटविषये प्रवादोऽयं यदसौ मीमांसक आसीदिति। अद्य यावदस्य कोऽपि निश्चितताधारो नोपलब्धः। इतिहासोऽप्यस्य नातिप्राचीनः।5 यतोऽभिनवगुप्तमम्मटजगन्नाथदिभिरिदं तथ्यं मनागपि न सूचितम्। सर्वतः प्रथमं कदाचित्काव्यप्रकाशभाष्यकारेण वामनझलकीकरेण सप्तचत्वारिंशदुत्तरसप्तदशशततमेशुख्रीष्टाब्दे स्वकीयायां बालबोधिन्याख्यायां व्याख्यायां संकेतोऽयं दत्तः..यथा लोल्लटो भट्टमतोपजीवी मीमांसक्ष आसीत्,सम्भवतश्चतत एव प्रेरणां प्राप्य डाक्टर पी.बी. काणेयेनाऽप्यभिनवभारतत्या एकस्योद्धरणस्याधारेण तस्य पूर्वमीमांसकत्वमनुमितम्।6 अनयोरुल्लेखयोश्चवाधारेण गतानुगतिकतावशात् हिन्दीसंस्कृतयोराधुनिका विद्वांसो लोल्लटस्य रसविवेचनां मीमांसाश्रितां मन्यन्ते। सेठ कन्हैयालालपोद्दार..डाक्टर श्यामसुन्दरदास..डाक्टर गुलाबराय.. पण्डितरामदहिनमिश्रादिभिर्निर्भ्रान्तरूपेणेदं तथ्यमाघोषितम्। आचार्यविश्वेश्वरेणापि परम्परामेव समर्थयता लिखितम्..इयं व्याख्या टीकाकारैर्मीमांसासिद्धान्तानुसारिणीत्युक्ता मीमांसापदेनात्रोत्तरमीमांसा वेदान्तदर्शनं वा ग्राह्यम्। वेदान्तेषु हि जगदाध्यासिकप्रतीतित्वेनोपवर्णितम्। यथा रज्जौ सर्पस्याध्यासिक्याः आरोपिताया वा प्रतीतेः समयेऽविद्यमानेऽपि सर्पे सर्पप्रतीतिस्ततश्चव भयादिकार्योत्पत्तिर्भवति। एवमेवाभिनयादिसमये रामादिगता सीतादिविषयिणी अनुरागादिरूपा रतिविद्यमानापि नटे विद्यमानतया प्रतीयते, प्रतीत्या चानया सहृदयानां चमत्कारानुभूत्यादिकार्याणामुत्पत्तिर्भवति। एतस्मादेव सादृश्यादयं सिद्धान्तो मीमांसामुत्तरमीमांसा वेदान्तदर्शनं वानुगच्छन् सिद्धान्तः कथयितुं शक्यते, यदस्या व्याख्यायाः कर्ता भट्टलोल्लटो मीमांसक आसीदिति, किन्तु वर्तमानैः शोधकर्तृभिरस्य मूलस्रोतसोऽन्वेषणे किमपि निश्चितं प्रमाणं नाधिगतम्। प्रमाणाभावे च कस्यचित्प्राचीनप्रवादस्यावृत्तिरनुसन्धाननियमाद्विरुध्यते। अतोऽस्य स्वीकारे किमपि कारणमद्य नासाद्यते यल्लोल्लटः पूर्वमीमांसक उत्तरमीमांसको भट्टमतोपजीवी मीमांसकोवाऽऽसीदति। डाक्टरकान्तिचन्द्रपाण्डेयेनैतत्साधयितुं प्रयतितं यल्लोल्लटः शैव आसीदिति तदीयस्थापनाया द्वावाधारौ स्तः...वसुगुप्तस्य स्पन्दकारिकायां

कस्यचिल्लोल्लटस्यैका वृत्तिर्लभ्यते,अनुसन्धानशब्दस्य च योजनार्थे लोल्लटकृतः प्रयोगोऽपि शैवदर्शनानुसार्येव। कल्पनेयमुपर्युक्तकल्पनाभ्यः साधारणेतरेत्यसन्दिग्धम्। किन्त्वस्या अपि सर्वथा प्रामाणिकत्वं न सुग्रमान्यम्। प्रथमं तावदिदमेव निश्चेतुं नास्ति किञ्चिद्विश्वस्तं प्रमाणं यदनुसन्धानशब्दस्य प्रयोगो लोल्लटेन योजनार्थे कृत इति। अपरञ्च लोल्लटविवेचनं शैवाद्वैतेन सह कथमपि न संगच्छते। अतोऽयं विकल्पोऽपि सन्दिग्ध एव। अन्ते डाक्टरतारकनाथशास्त्रिणा7 स्वकीये शोधप्रबन्धे स्थायिभावस्योत्पत्तिमाधृत्य 'असत्कार्यवदेन' सह लोल्लटस्य रसविवचनायाः सम्बन्धः स्थापितः। किन्तु यथोपर्युक्तविवेचनं स्पष्टीकृतं मया यल्लोल्लटेनोत्पत्तिशब्दः 'अभावे भावकल्पनायै न प्रयुक्त, इति। स भावानां वासनात्मतया स्थितिमवागच्छत्, स्थायिव्यभिचारिणोरूभयोरपि प्रसंगेषु स वासनापदं प्रांयुङ्क्त... 'कस्यचिद्वासनात्मकता स्थायिवत्,'व्यभिचारिणश्च व यद्यपि न सहभाविनः स्थायिना तथापि वासनात्मनेह तस्य विवक्षिताः'।9

इति प्रस्तुत प्रसंगेयदीदमपि स्वीक्रियेत यदियं वासनाविषयिणी टिप्पणी अभिनवेनारोपितेति तथापि कदाचिदियं कल्पना न संगच्छेत यद्भारतीयदर्शनस्यानयातिप्रचलितया धारणया लोल्लटस्यापरिचय आसीदिति, इमां स नांगीकरोतिस्मेति वा। अत एवासत्कार्यवादस्याधारोऽपि नयुज्जते, अन्ते च निष्कृष्यते तावदिदमेव, यदुपलब्धसामग्रीमाधृत्यंलोल्लटकृतरसविवेचनस्य दार्शनिक्या भूमिकाया निर्धारणं न सम्भवति। एतदेव च शक्यते वक्तुं यत् तदीया दृष्टिर्भरतवद् व्यावहारिक्यासीदिति।

## 2-अनुमितिवादः

भरतसूत्रस्यापरो व्याख्याता श्रीशङ्कुकः प्रसिद्धः। अयमपि भट्टलोल्लटवत्केवलं नामशेषः । अनुमानेन तटस्थो रसोऽनुमेयो भवति। चित्रतुरगन्यायेन नटे रामादिविषयिणी धीरुत्पद्यते। चित्रिते तुरंगे यथा 'तुरंगोऽयम्' इत्येष व्यवहारो भवति परं न सा प्रतीतिः सत्यत्वेन वा असत्यत्वेन वक्तुं शक्यास्ति। न सा अनृता, न च सन्देहरूपा, न च सा सादृश्यरूपैव। तदेवं चित्रस्थेऽश्वे जाता सा धीः प्रोक्तचतुर्विधीतो भिन्नैव। अनेनैव प्रकारेण नटे समुत्पन्ना

रामादिसम्बिन्धिनी बुद्धिः सम्यङ्मिथ्यासंशयसादृश्यविधाभ्यश्चतसृभ्योऽपि प्रतीतिभ्यो विलक्षणैव।

चित्रतुरगन्यायेन विभावभूतानां रामादिकानां प्रतीतिरनुमिता भवति ततो रसोऽनुमेयतामुपैति। किञ्च यैरनुभावव्यभिचारिभावरूपलिंगैस्तत्र 'इयं सीता रामविषयकरतिमती, तत्र विलक्षणस्मितकटाक्षादिमत्वात्' इत्येतद्विधमनुमानमुदेति, परं तानि लिंगान्यपि न सन्ति यथार्थानि। यथार्थस्मितकटाक्षाद्यनुभावास्तु यथार्थरामादावेव सम्भवाः परं नटे स्मितकटाक्षादिकं वीक्ष्य 'इयमभिनेत्री सीता रामविषयकरतिमती' वा रामेऽयमभिनेता सीता विषयकरतिमांस्तत्र स्तम्भस्वेदाद्यनुभावदर्शनात् इत्येतादृशस्यानुमानिकरसस्य प्रतीतिर्नटे
सञ्जायते। एतेन भरतसूत्रस्थस्य संयोगस्यार्थो गम्यगमकभावसम्बन्ध इत्येतत् सिद्ध्यति। अनुमेयस्य रसस्याप्याधारः सामाजिको न, कृत्रिमरामादिवर्तिरसः सामाजिकेनानुमीयते। अनुमानादिजन्यं ज्ञानं परोक्षरूपमेव भवति। अपरोक्षप्रतीत्याः कारणं तु प्रत्यक्षनाम प्रमाणं भवति। परमियं रसानुमितिस्तु विलक्षणैव। अतः सा भवन्त्यपि अनुमितिरनुमित्यन्तराद् भिन्नेव। भवति च सा अपरोक्षस्वरूपा। एतस्माद्धेतोस्तमनुमितं रसं सामाजिक आस्वादयितुं क्षमते।

रसास्वादसम्बन्धिनीं तां क्षमतां सामाजिके, तद्गता (सामाजिकगता) वासना समुत्पादयति। रसप्रतीत्या च विलक्षणायाः अपरोक्षतायाः कल्पना विभाव्या। वस्तुतोऽनुमितो रसः समाजिके न सन्तिष्ठते, न च कृत्रिमे रामादौ परं वासनाया बलात् सामाजिके विद्यमानः नटेऽप्यविद्यमानः सोऽनुमीयमानो रसः सामाजिकेनास्वाद्यते।

शङ्कुकस्यास्त्ययमुपरिस्थितो विचारः। तस्यायमनुमितिवादो न्याय सिद्धान्तनिष्ठः।

एतन्मतसम्बद्धान्युद्धरणानि कानिचिदभिनवभारत्याम्, ध्वन्यलोकलोचने च तथैक मुद्धरणं काव्यप्रकाशे लभ्यते। हेमचन्द्रप्रदीपकारयो रसविवेचनासूद्धृतानि शङ्कुकमतानि प्रायेणैतान्येवाधृतानि सन्ति।

अभिनवभारती समुद्धृतं श्रीशङ्कुकमतम्.

'तस्माद्धेतुभिर्विभावाद्यैः कार्यैरनुभावात्मभिः सहचारिरूपैश्च व्यभिचारिभिः प्रयत्नार्जिततया कृत्रिमैरपि तथा नाभिमन्यमानैः,अनुकर्तृस्थत्वेन लिंगबलतः प्रतीयमानः स्थायिभावो मुख्यरामादिगतस्थाय्यनुकरणरूपः । अनुकरण्त्वादव च नामान्तरेण व्यपदिष्टो रसः।'

'विभावा हि काव्यबलानुसन्धेयाः। अनुभाषा शिक्षातः।

व्यभिचारिणः कृत्रिमनिजानुभावार्जनबलात्। स्थायी तु काव्यबलादपि नानुसन्धेयः। रतिः शोकः इत्यादयो हि शब्दा रत्यादिकमभिधेयीकुर्वन्त्यभिधानत्वेन न तु वाचिकाभिनयरूपतयाऽवगमयन्ति।'

'अत एव स्थायिपदं सूत्रे भिन्नविभक्तिकमपि नोक्तम्।'

'तेन रतिरनुक्रियमाणा शृंगार इति तदात्मकत्वं तत्प्रभवत्वं चायुक्तम्। अर्थक्रियापि मिथ्याज्ञानदृष्टा...

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति।।'

'न चात्र नर्तक एव सुखीति प्रतिपत्तिः। नाप्ययमेव राम इति। न चाप्ययं न सुखीति। नापि रामः स्याद्वा न वायमिति। नापितत्सदृशः इति। किन्तु सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणा चित्रतुरगन्यायेन यः सुखी रामः असावयमिति प्रतीतिरस्तीति। तदाह...

प्रतिभाति न सन्देहो न तत्त्वं न विपर्ययः।
धीरसावयमित्यास्त नासावेवायमित्यपि।।
विरुद्धबुद्धिसम्भेदादविवेचितसम्प्लवः।
युक्त्या पर्यनुयुज्येत स्फुरन्ननुभवः कया।।' इति।

ध्वन्यालोकलोचने

द्वितीयोद्योते शङ्कुकनामनिर्देशं विनैवाभिनवगुप्तेन तस्य रसविषयिका मान्यता समुद्धृता....

'अन्ये तु अनुकर्तरि यः स्थाय्यवभासोऽभिनयादिसामग्र्यादिकृतो भित्ताविव हरितालादिना अश्वावभासः, स एव लोकातीततयाऽऽस्वादापरसंज्ञया प्रतीत्या रस्यमानो रस इति नाट्याद् रसा नाट्यरसाः।' इति।

मम्मटस्य काव्यप्रकाशे समुद्धृतं शङ्कुकमतम् 'काव्यानुसन्धानबलाच्छिक्षाभ्यासादिनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादि शब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावादरूपाद् अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः।'इति।

श्री शङ्कुकाभिप्रायः...

अनुकार्यगतस्थायिभावस्य नटानुकृतं रूपं रससंज्ञयाभिधीयते। स्थायिभावः परमार्थतोऽनुकार्ये रामादावेवावतिष्ठे, नटः स्वकौशलेन तमनुकरोति, प्रतीयते च यथायमपि स्थायिभावमनुभवति। 'स्थायिभावस्येयं

नाट्यानुकृतिरेव रसः।'

विभावानुभावव्यभिचारिभावास्तु नाट्येषूपतिष्ठन्त एव, परं स्थायिभावो नोपतिष्ठते। शब्दादिना केवलमसौ बोध्यते न तु प्रतीयते । तदुपस्थानमभिनयमात्रेणैव सम्भवति। अतो भरतसूत्र भिन्नविभक्तिकतयापि सीायी न निर्दिष्टः। सामाजिको विभावादिलिंगैस्तमनुमिनोति 'नटानुक्रियमाणरामादिस्थायिभावम्।'

अनुकरणप्रक्रिया तु विभावाद्यनुकरणेन काव्याधारकृतेन भवति। कविना नाट्ये विभावादयो यथा चित्र्यन्ते, अनुकर्त्ता तथैव व्यवहरति। अनुभावानुकरणमभिनयकलाशिक्षया सम्भवति। व्यभिचारिभावानुकरणं नटः स्वकृत्रिमानुभावाधारेण सम्पादयति। लोकानुभवे चिन्ताहर्षादिषु यादृशमानवमुद्राः पश्यति तादृश्य एव मुद्राश्चिन्ताहर्षादिषु वास्तविकानुभवमन्तरैव कृत्रिमरूपेणोक्तव्यभिचारि- भावाभिनयेषु दर्शयति। इत्थं विभावानुभावव्यभिचारिभावाभिनया नटकौशलेन कृत्रिमा अपि पारमार्थिकाः प्रतीयन्ते।

इदं विवेचनं तावदभिनयकलादृष्ट्या तूपयुज्यत एव, इदमप्यस्य विशिष्टे महत्वं यदनुकार्यस्य वास्तविकस्वरूपविषयकः प्रश्नः कदाचिदिदंप्रथमतयाऽत्रैव समाधीयते स्फुटीभवति च यदनुकार्यपदार्थः काव्यनिबद्धरामादिपरः, नैतिहासिकरामादिपर इति। मूलतस्त्वैतिहासिकरामादिरेवानुकार्यः, परमसौ कवेरेवानुकार्यो न नटस्य, नटस्यानुकार्यस्तु काव्यनिबद्धो रामादिरेवेति।

अत्रेदं शङ्क्यते...नटगतस्थायिभावेऽवास्तविके प्रेक्षकेण तदनुमानं मिथ्याज्ञानं स्यात, मिथ्याज्ञानेन चानेन प्रेक्षकस्य नाट्यरसास्वादनं वास्तविकं कथं स्यात्? इत्येषा शंका द्विधा समाधीयते....

नटे रामत्वप्रतीतिर्न भ्रान्तिमात्रम, नाट्ये हि नटं रामरूपं पश्यतां सन्देहोऽपि नोदेति नैव यथार्थज्ञानं नापि भ्रान्तिरेव।नटो राम एवेत्यपि प्रतिभाति, नटो रामो नास्तीत्यपि प्रतिभाति। इत्थं नटे रामत्वप्रतीतिः काचिद्विचित्रा (कलाजन्या) प्रतीतिर्भवति, या सन्देहयथार्थज्ञानभ्रान्तिरूपाणां मध्ये कस्यचिदपि वास्तविकानुभवस्य तद्रूपा न भवति। अतो नाट्यप्रतीतिर्विशिष्टा काचित्कलाजन्याप्रतीतिरस्ति। यस्याः शुद्धभ्रान्तित्वेन मिथ्याज्ञानत्वेन वा स्वीकरणं न संगच्छते।

कलाजन्येमेव विशिष्टा प्रतीतिश्चित्रतुरगन्यायाश्रयेणाधिकं स्फुटीक्रियते। नटे रामवत्प्रतीतिः सम्यग्यथार्था वा नास्ति ,नटो हि वस्तुतो नास्ति रामः। नापि सा मिथ्याज्ञानरूपा नटे हि रामत्वारोपो न तथा निराधारो यथा रज्जौ सर्पभ्रमः। नापि सा संशयात्मिका, नाट्यं प्रेक्षणामाणस्य हि

समाजिकस्य मनस्ययं संदेहो नोदेति यत्पुरस्तादयं नटो वास्त रामो वा। सन्देहः किल कलाप्रतीतेर्महान् प्रत्यूहः। संशयाकलितं मनः कलानन्दं न विन्दति।अन्ते चेयं प्रतीतिः सादृश्यमानमपि न भवति। प्रेक्षकस्य हि नेयं प्रतीतिर्भवति यदयं नट एवास्ति रामसदृशः इति । अतो नयं सामान्या प्रतीतिः, अपि तु विलक्षणैव। कीदृशी पुनरस्या विलक्षणता? यादृशी किलाश्वचित्रेऽश्वप्रतीतेः। इयं प्रतीतिः कलाप्रतीतिरिति सामान्यप्रतीतिभेदेभ्यो भिन्नेयम्। इत्थं शङ्कुकेनापि स्वशैल्या कलानुभूतिवैलक्षण्यमाख्यातम्, यः सर्वसम्मतत्वाभावेऽपि विश्वस्य प्राचीननवीनसौन्दर्यशास्त्रस्यैको बहुमान्यः सिद्धान्तोऽस्ति।

अस्य विवेचनस्यायं सारांशो यत्काव्यरंगकौशलाभिनयकलादिसाहाय्येन सीता रामरूपव्यवहारादिविभावानुभावव्यभिचारिभावाभिनयेन नटीनटौ यदा तदीयरत्यादिस्थारूयभिनये सफलौ भवतः... रंगमञ्चे तदीयप्रणयदृश्यं प्रस्तुतस्तदा रसो निष्पद्यते। अतो काव्यरंगकौशलादिसहकृतनटविहितस्थायिभावानुकृतिरिति रस निष्पत्तिपदार्थः स्थायिभावाभिनय इति सरलोक्तिः।

इत्थं शङ्कुकमतेन रसाधारो नटः, एतदनुसारेणापि रसो भावाश्रितैका कलात्मकस्थितिरेव, यत्राभिनयतत्वं प्रधानम्, काव्यतत्वं च गौणम्, काव्यं हि तत्राभिनयसहायकमात्रम्। अनया दृष्ट्येदं मतमपि भरतसम्मतार्थसन्निहितम्। अत्रापि रसो नानुभतिरूप, अपि तु स्थितिरूप एव। अतावानेन भेदः भरतेन काव्यनाट्ययोस्तुल्य बलत्वम्, शङ्कुकेन चाभिनयतत्वे मुख्यत्वं प्रतिपादितम्। लोल्लटादप्यस्य भेदः लोल्लटेन रसस्यानुभूति- रूपत्वमुरीकृतम्, यद्यपीयमनुभूतिर्न सहृदयस्य, अपि त्वनुकार्यस्य मूलपात्रस्यैवास्ति।

इत्थं शङ्कुकमतेन रसाधारो नटः, एतदनुसारेणापि रसो भावाश्रितैका कलात्मकस्थितिरेव, यत्राभिनयतत्वं प्रधानम् काव्यतत्वं च गौणम्, काव्यं हि तत्राभिनयसहायकमात्रम्। अनया दृष्ट्येदं मतमपि भरतसम्मतार्थसन्निहितम्। अत्रापि रसो नानुभूतिरूप, अपि तु स्थितिरूप एव। एतायानेव भेदः, ररतेन काव्यनाट्ययोस्तुल्यबलत्वम्, शङ्कुकेन चाभिनयतत्वे मुख्यत्वं प्रतिपादितम्। लोल्लटादप्यस्य भेदः लौल्लटेन रसस्यानुभूति- रूपत्वमुरीकृतम्, यद्यपीयमनुभूतिर्न सहृदयस्य, अपि त्वनुकार्यस्य मूलपात्रस्यैवास्ति।

रसस्य प्रेक्षकेण सह कः सम्बन्धः? इति प्रश्ने शङ्कुको मन्यते. प्रेक्षको नाट्यशालाप्रदर्शितविभावानुभावव्यभिचारिभावे रसमनुमिनोतीति। अभिनवदत्तोद्धरणे केवलमेतावदुक्तम्, किन्त्वेतेन ध्वन्यते यदेतेनानुमानेन

सहृदयश्चवमत्कृतो भवति, अन्यथा तत्र तत्प्रवृत्तिः कथं सम्भवति। मम्मटेन सहृदयपक्षोऽधिकं विशदीकृतः। सहृदय एकतो वस्तुसौन्दर्येणापरतश्च स्ववासनाबलेनास्य रसस्य रसरूपाया वाऽस्याः कलात्मकस्थितेः चर्वणं करोति, सामान्येना- नुमानमेकं परोक्षज्ञानम्, प्रस्तुतप्रसंगे तु तदनुमानमुपर्युक्तैः कारणैः प्रत्यक्षमास्वाद्यञ्च जायते। हेमचन्द्रेणास्याः प्रक्रियायाः स्पष्टीकरणाय दृष्टान्तोऽयमुपस्थापितः 'कश्चिवत्किमपि कषायफलं भक्षयति, तन्मुखाकृतिचेष्टे सूचयतो यथार्थं कषायफलं भक्षयतीति। तदास्मन्मुखे तादृशमेव जलमुल्लसति यादृशं तस्य कषायफलभक्ष- कस्य मुखे उल्लसितं स्यात्। यदि वा कषायफलमश्नतामस्माकं मुखे। इत्थमेव रामरूपाभिमतस्य नटस्य स्थायिभावं प्रेक्षमाणस्य सामाजिकस्य वासनात्मतया स्थिते स्थायिन्यपि चर्वणावकाशो भवति। अभिनवस्योद्धरणे तावदिदं सर्वं नास्ति। वस्तुतो मम्मटेन परवर्तिनीनां मान्यतानां बलेन वासनादीनां कारणेष्वन्तर्भावः कृतः।

अनुकार्यगतः स्थायिभावः

नटेनानुक्रियमाणः स्थायिभावः सहृदयेन रसानुमितिः

(रसः)

अनया त्रिकोण्या रसाधारः स्फुटमनुकर्तैव, निष्पत्तिश्चानुकृतिः। स्थायिभावो ह्यनुक्रियमाण एव रसो निष्पद्यते, किञ्च प्रेक्षको विभावादिभिर्नं रसमनुमिनोति, अतस्तद्दृशा रसोऽनुमीयते, निष्पत्तिपदार्थश्च अनुमितिरिति जायते, संयोगश्च गम्यगमकभाववाचको भवति। अयमत्र निष्कर्षः शङ्कुकस्य रसव्याख्याने नटस्थितिप्रधानतया निष्पत्तेः प्राथमिकोऽर्थोऽनुकृति- रित्येव भवति, अनुमितिरिति तु तस्या गौणो वाऽऽक्षिप्तो वार्थः, यः प्रेक्षकसन्दर्भेणावस्थानान्तरे सिद्ध्यति।

भट्टतोतेन शंकु कानुकरणवादनिरासः

शंकुकमतमभिनवगुप्तेन स्वगुरोराचार्यभट्टतोतस्य माध्यमेन निरस्तम्। इमे समेतर्का भट्टतोतस्यैव सन्त्यभिनवस्य वा स्वतर्का अप्येष्वन्तर्निविष्टाः सन्तीति भट्टतोतग्रन्थाभावे निर्णेतुं दुःशकम्। एतेषामयं सारांशो यन्नहि प्रेक्षकदृशा स्थायिभावानुकरणं सम्भवति, न नटदृशा, नापि तत्वविवेचकस्यैव दृशा..न च भरतेनैवास्य संकेतः कृत इति।

तत्र प्रेक्षकदृशा...प्रमाणाभावे प्रेक्षकः कथमनुभवितुं शक्नोति यन्नटो राममनुकरोतीति। अनु करणप्रतीतये ह्यनुकार्यानुकर्त्रो- रुभयोरपि क्रिययोर्ज्ञानमपेक्ष्यते। येन रामादिर्दृष्टः स एव तद्रूपव्यवहारानुककरणं प्रत्येतुं प्रभवति। परं रामादिः केन दृष्टः? विभावाद्यनुकरणप्रतीतिरिन्द्रियमाध्यमेन, स्थायिभावानुकरणप्रतीतिश्च मनोमाध्यमेन भवति, आत्ममाध्यमेन वा। अतो मूर्तविभावा- दिगतैन्द्रियप्रतीत्या अमूर्तभावामानसिक प्रतीतिकल्पना न संगच्छते।

यद्युच्यते...यथा लोकजीवने वास्तविकनरनारीव्यवहारदर्शनेन सामाजिकस्य रतिप्रत्ययो भवति तथा रंगमञ्चेऽपि नटनटीगतकृ- त्रिमव्यवहारदर्शनेन तस्य कृत्रिमाया अनुकृताया वा रतेरपि प्रत्ययो भविष्यतीति तर्ह्येषा तर्कणा भ्रान्तिमूला। यतो हि यदि प्रेक्षको नटनटीव्यवहारं कृत्रिमं मन्यते तदा तु तस्य रतेर्भ्रान्तिरेव सम्भवति न प्रतीतिः कृत्रिमाया अनुकृताया वा रतेः। यदि चायं नटनटीव्यवहारं वास्तविकं मन्यते तदा तस्य वास्तविक्या एव रतेः प्रतीतिः स्यान्न रत्यनुकरणस्य। अन्ते च यद्ययं तर्को दीयते यत्सामाजिकस्य वस्तुतोऽक्रुद्धोऽपि नटः क्रुद्ध इव प्रतीयते स्थायिभावस्य दृश्यस्य देयं प्रतीतिरेव तस्यानुकरणप्रतीतिरस्तीति तथापि तथ्यं न सिद्ध्यति। यतः सादृश्यप्रतीतिस्वीकारे तु सामाजिकसय नटे भावावेशरहितत्वमेव प्रत्येष्यते..नटे स भावकत्व- नामपि न करिष्यति। इत्थञ्च प्रेक्षकदृशा स्थायिभावस्यानुक्रि- यमाणता सेद्धुं न शक्यते।

नटदृशा...

नटदृशापि स्थाय्यनुकृतिर्न सिद्ध्यति। यदि सदृशीकरणमनुकृत्यर्थः, तदा मूलव्यक्तिदर्शनमन्तरा तत्कथं स्यात्? यदि च पश्चात्करणमनुकृत्यर्थः, तदा किमिति नट एव, कश्चिदपि रतयाद्यनुभववान् रामादिस्थायिभावमनुकर्तुं शक्नोति। तदा तु लौकिकी भावानुभूतिरपि रसो निष्पद्यते। इदमपि प्रश्नान्तरमत्रोदेति.. नटः केन साधनेन शोकादिस्थायिभाव- मनुकरोतीति। स्वशोकादिनेति चेततदेदमनुकरणं प्रत्यक्षशोकाद्यनुभूतेः कथं भिद्यते? अश्रुपातादिनेति चेन्नटाश्रुपातेन रामाद्यनुकार्याश्रुपा- तस्यअनुभावस्यैव वानुकृतिः प्रभवति, न स्थायिभावस्य। शंकुकोऽत्रैकं विकल्पान्तरमपि रूपाननुभावान प्रकाशयति, उचितेन कण्ठध्वनिना काव्यमुच्चार्य स्थायिभावमनुकरातीति। किन्चिदमपि स्थायिभावानुकरणमिति वक्तुं न शक्यते। अतो नटदृशापि स्थाय्यनुकृतिर्न सिद्ध्यति।

तत्वदृष्ट्यापि वस्तुस्थितौ विवेचितायां रसस्यानुककरणरूपता न सिद्ध्यति। कथम्? तत्रायमभिनवतर्कः..पश्चात्प्रतीतं वस्तुवृत्तमिति न शक्यं वक्तुम्। अस्य वाक्यस्य को वास्तविकोऽर्थः इति न स्पष्टम्। अभिनवेनात्र केवलमेतदुक्तं स्यात्...'यच्च वस्तुतो वस्तुवृत्तं तदग्रे वक्ष्याम' इति। आचार्यविश्वेश्वर... डाक्टरकान्तिचन्द्रपाण्डेय.. डाक्टर प्रेमस्वरूपादिभिरतप वाक्येऽस्मिन् कश्चित्प्रकाशो न पातितः। अस्यायमाशयः स्यात्.. 'अनुकरणं पश्चाद्भाविनी घटना, तथ्यघटनान्तरमेव तदनुकरणं सम्भवति। अतोऽनुकरणम् अनुसंवेद्यमानं तथ्यमस्तिः रसश्च सद्यः परनिवृतिरूपः। इत्थं तत्वदृष्ट्यापि रसौऽनुकरणरूपो न सिद्ध्यति।

भरतमतेन.....

अन्ते, भरतमतेनाप्यनुकरणवादो न सिद्ध्यति, नास्ति हि नाट्यशास्त्रे तादृशः कश्चन संकेतः। प्रत्युतः तद्विरुद्धमेव किञ्चितप्रमाणं प्राप्यते। भरतस्येयम् नाटके सप्तद्वीपानुकृति5 स्यात् इत्युक्तिरपि नोक्तं मतं पुष्णाति। अत्र प्रश्नः स्यात्.. यदा नाट्ये सकलस्य जगतोऽनुकृतिर्भवति तदा स्थायिभावानुकृतिः कथं न स्वीक्रियते? इत्यस्येदमुत्तरम्, स्थायिभावानुकरणे हि स्वीकृतेऽपि नैतसिद्ध्यति यत्स्थाय्यनुकृतिरेव रस इति।

इत्थं शंकुकस्यानुकृतिवादः सर्वथैवाऽसिद्धो भवति। आचार्यविश्वेश्वरोल्लेखानुसारेण चोपर्युक्तेन विवेचननेदमपि स्पष्टीभवति यत्तस्य सिद्धान्तोऽनुमितिवाद इत्यपेक्षया मूलतोऽनूकृतिवाद इत्याख्ययैवोक्तो भृशमुपयुज्येत। अभिनवस्य हि सर्वोऽपि यत्नोऽनुकृतिवादस्यैव खण्डनेऽस्ति। अनन्तरन्तु मम्मटेन सहृदयदृशा व्याचक्षाणेन रसस्यानुमिवावधिकं बलमाहितम्, तदनुसरणेन च शंकुकसिद्धान्तोऽनुमितित्रादनाम्ना प्रसिद्धः। ऐतिहासिकदृष्ट्या तु प्रसंगेऽस्मिन्मम्मटादभिनवस्यैव मतं निश्चयेन प्रामाणिमतरम्।

शङ्कुकमतस्य सीमा शक्तिश्च....

शङ्कुकमतस्य सीमानस्तच्छक्तेः स्पष्टतराः सन्ति। अभिनवेन सकलेन स्वबुद्धिबलेन तदनुकरणवाददोषा उद्घाटिताः। एतेषांदोषमूलकाक्षेपाणां मूलं चानुकरणशब्दस्यासामर्थ्यमेवास्ति। शङ्कुकात्सार्धसहस्राब्याः प्राग्यवनाचार्योऽरस्तुरपि काव्यतदितरललि- तकलाप्रसंगेऽमुमेव शब्दं प्रयुञ्जानोऽनुकरणसिद्धान्तं प्रतिपादितवान्। तदनुसारेणापि काव्यादिकथा न केवलं मूर्तपदार्थान्, अपि त्वमूर्तान् भावान् विचारानप्यनुकुर्वन्ति। अनुकरणस्य व्यापकप्रयोगवशादस्यानेका व्याख्याः प्रास्तुयन्त, अन्ततश्चचास्यार्थः कल्पनात्मकं पुनः सर्जनम् इत्यक्रियत। अयमर्थविस्तरः.. अनुकरणं सर्जनसन्निधावानेतुं प्रयासः. .. वस्तुतः शब्दस्य स्वकीयमसामर्थ्यं द्योतयति। अयमभिप्रेतोऽर्थस्तु साधीयान्, परं शब्दे स्वयमेनमर्थं वक्तुं शक्तिर्नास्ति। इयमेव दुर्घटना शङ्कुकविषयेऽपि घटिता.. तस्यायमभिप्रायो यन्नटो रामादिव्यवहारमनुकुर्वन् कल्पनया तेन सह तादात्मयं स्थायित्वा तदीयरत्यादिस्थायिभावस्यापि कल्पनात्मिका- मनुभूतिं करोति। इयं कल्पनात्मिकानुभूतिरवास्तविकत्वात्कृत्रिमानुभू- तिरेव। इदञ्च वचनं नानुचितम, किन्त्वनुकरणकृत्रिमशब्दयोरसामर्थ्य- नासमञ्जसतां गतम्।

शंकुकसिद्धान्तस्यापरा सीमा रसानुमितिमल्पनास्ति।

लिंगाल्लिंगिज्ञानमनुमानं बौद्धिकी क्रिया, अतः सा परोक्षानुभूतिरेव सम्भवति। न तु प्रत्यक्षा नाप्यास्वादात्मिकेति शंकुको जानीते। अतस्तेनेदमनुमानं सामान्याद्विलक्षणममानि। मम्मटेनेमां चर्वणां सामाजिकवासनाधारेण व्याख्यातुं प्रयतितम, यत्संगेतोऽभिनवोद्धरणे नास्ति। इदमखिलं काठिन्यं वस्तुतो रसानुमानकल्पनाहेतोरेवोपस्थितम्। यत्तत्वतो भ्रान्तिमूलमेव। भावस्यानुमानमपि

शंकुकेन स्पष्टमुक्तम्.. नाट्ये कविनिबद्धपात्रमेवानुकार्यपदार्थ इति।

सामान्यप्रतीतेः कलाप्रतीतौ वैलक्षण्यस्य स्थापनापि शंकुकस्य सूक्ष्मचिनतनां परिचाययिति। विवादास्पदत्वेऽपि कलाशास्त्रस्यायमतिप्रसिद्धो बहुमान्यश्च सिद्धान्तोऽस्ति, अद्यापि चास्य समर्थका नाल्पसंख्याः।

रसघटनायां शंकुकस्य प्रेक्षको लोल्लटस्य प्रेक्षककादतिसक्रियरूपेण भागं भजते। स नाट्योपस्यापितविभावादिलिंगैर्नटानुक्रियमाणस्थायिभावरूपस्य रसस्यानुमितिं करोति। लोल्लटः प्रेक्षकमेकान्ततोऽत्यजत्.. नास्ति हि तस्योपलब्धोद्धरणेषु कश्चिदुल्लेखः।यदा समस्तनाट्यप्रपञ्चविधानमेव प्रेक्षकस्य कृते भवति, तदा स कथमुपेक्षणीयः। शङ्कुकोऽमुं स्वतः सिद्धं तथ्यं प्रत्ययन् प्रेक्षकपक्षं गृहीतवान् रससन्दर्भे च तदस्तितवस्योचितमान्यतां प्रदत्तवान्। इत्थं रसस्य व्यक्तिपरकधारणाया विकासे शङ्कुकस्य योगदानं स्पष्टम्।

अन्ते च रसविवेचनस्य निश्चितदार्शनिकभूमिकायां प्रतिष्ठापनायाः यशः सर्वप्रथमं शङ्कुकेनैव प्राप्तम्। तदनन्तरं रसस्वरूपविश्लेषणे दार्शनिकचिन्तनाया निश्चितः प्रवेशोऽभवत्, तेन यद्यपि काचिद्दुधानिरप्यभवत्। परं विचारस्तरः सहसोच्चैरूदतिष्ठत्। भवति परं तत्परोक्षं विचाररूपमेव वा भवति नानुभूतिरूपम्। इतो विपरीतं रसास्वादः साक्षात्कारात्मकः निश्चितरूपेणानुभूत्यात्मकश्च भवति। अतो रसानुमितिधारणाऽनुभवेनासिद्धैव।

अस्मिन् सिद्धान्ते तृतीयो दोषोऽयमस्ति.रसेऽभिनयतत्वं प्रधानं काव्यतत्वञ्च गौणमिष्यते यद्भारतीयपाश्चात्योभयकाव्यचिन्तनपरम्पराप्रतीपम्। भारतीयसाहित्यशास्त्रे त्वभिनयात्काव्यस्यैवाधिकं महत्वं प्रदत्तम। अभिनयः कला उपविद्या वास्ति काव्यञ्च विद्या। पाश्चात्येष्वपि काव्यमेव कलानां सर्वश्रेष्ठं रूपं मन्यते। शङ्कुकेन रसस्य नटकृतानुकरणपर्यायत्वं काव्यस्य च नटकौशलसहायकमात्रत्वं मत्वा क्रमोऽयं विपर्यासितः। वस्तुतो रसपरिपाकस्य निदानं काव्यमेव, अभिनयस्तु तस्य पोषकमात्रम् ।

लोल्लटेन रसस्यानुकार्यप्रत्यक्षानुभूतिरूपत्वं मत्वा नाट्यगतभावे प्रत्यक्षभावे च या मिथो भ्रान्तिरुत्पादिता, शङ्कुकस्तां निराकरोत्। तेनेदं स्पष्टीकृतम्, यन्नाट्यगत भावस्य न प्रत्यक्षानुभूतिः अपितु तदनुकरणरूपा, कल्पनात्मिकानुभूतिर्वा। कलामनोविज्ञानस्येदमेकं महत्वपूर्ण तथ्यमस्ति रसस्य च स्वरूपविश्लेषणेऽस्य महत्वमसन्दिग्धम्।

अनुकार्यस्य वास्तविकस्वरूपमपि शंकुकेनैव स्पष्टीकृतम्। लोल्लटेनानुकार्यप्रसंगे मूलपात्रकविनिबद्धपात्रयोर्मध्ये भ्रान्तिरुत्पादिताऽऽसीत्। शंकुकसिद्धान्तस्य दार्शनिकी विचारधारा स्पष्टतरा। भरतस्य

दृष्टिर्व्यावहारिक्यैव। तेन मूलतो नाट्यव्यवसाये गौणतश्च सामाजिके दृष्टिं पातयता रसस्य व्यावहारिकविवेचनं कृतम्, नास्ति यत्र दर्शनप्रपञ्चः। लोल्लटविवेचने दार्शनिकचिन्तनप्रवेशस्तु ध्रुवं जातः, परं स तद्दृष्टिः नारूढः। भरतसमानान्तरे चलता तेन स्वव्यावहारिकदृष्टवावेवाधिकं विश्वसितम्। तदीयदार्शनिकसिद्धान्तविषये महान विवादः, वस्तुतश्चोचित प्रमाणाभावेन तन्निर्धारण्मसम्भवम्। परं शङ्कुकविषये नास्ति तादृशसन्देहप्रवेशावकाशविशेषः। उपलब्धोद्धरणैर्हि स्पष्टमिदं सर्वथा, यद्दर्शनदिग्गतासीन्नूनमस्य प्रवृत्तिः। तदाधारभूतं दर्शनञ्च नूनं न्या दर्शनमेवासीत्। लिंगाल्लिंगिज्ञानमनुमानम्, चित्रतुरगन्यायः, इत्याद्या धारणा, नैयायिकशब्दावली चात्र प्रमाणम्। अतः परं रसविषयस्य नवेनानुसन्धात्रा डाक्टरप्रेमस्वरूपगुप्तेनातिकौशलपूर्वकं तर्कप्रमाणपुरस्सरञ्चैतत्साधयितुं प्रयसितम् यच्छंकको वैदिकन्यायापेक्षया बौद्धन्यायमेवाधिकमास्थितोऽभूत्। परमत्र काचिच्छंका समुदेति. यद्रससिद्धान्तं प्रति कस्यचिद् बौद्धदार्शनिकस्याकर्षणं कियत्संभाव्येत। वैदिकदर्शनैस्तत्रापि विशेषाच्चैवदर्शनादिना सह यादृशः सम्बन्धोऽस्ति, तथा नावैदिकदर्शनैः। रससिद्धान्तस्य समग्रतिहासे द्वित्राणामवैदिकदार्शनिकानां गुणचन्द्ररामचन्द्रहेमचन्द्रादीनां नामानि तावद् प्राप्यन्ते, परन्ते शंकुकोक्तमनुमानं विशेषान्नं प्रोत्साहयन्ति। गुणचन्द्ररामचन्द्रन्तु सुखदुःखात्मक रसकल्पनया गंगा प्रतीपगामिनमेव कर्तुं प्रायततताम्। यद्यपीयं शंकापि नास्ति स्वयं किञ्चिन्निर्णायकं विपरीतं प्रमाणम्। तथाप्यहं मन्ये यद् वैदिकावैदिकन्यायप्रपञ्चेऽनिपत्य शङ्कुकस्य केवलनैयायिकत्मेव स्वीक्रियेत चेत् तदपि प्रामाणिकं स्यात्। शंकुकानन्तरमभिनवगुप्तेन नामोल्लेखं विनैव कस्यचित् साङ्ख्यवादिनो व्याख्याकारस्य मत निराकृतम्। अत्र प्रसंगेऽभिनवभारत्यां निम्नोद्धृताः पङ्क्तयः प्राप्यन्ते...

'येन त्वभ्यधायि सुखदुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव, साङ्ख्यदृशा सुखदुःखस्वभावो रसः। तस्याञ्च सामग्रयां दलस्थानीया विभावाः, संस्कारका अनुभाव्यभिचारिणः। स्थायिनस्तु तत्सामग्रीजन्या आन्तराः सुखदुःखस्वभावा इति।'

तेन 'स्थायिभावान् रसत्वमुपनेष्यामः' इत्यादावुपचारमंगीकुर्वता ग्रन्थविरोधं स्वयमेव बुध्यमानेन दूषणाविष्करणमौर्ख्यात्प्रामाणिको जनः परिरक्षित इति किमस्योच्यते। यत्तन्यत् प्रतीतिवैषम्यप्रसंगादि तर्तिक्रियदत्रोच्यताम्।

अस्य मतस्यायं सारांशः.....

रसस्य विषयसामग्री (विभावानुभावव्यभिचारिरूपा) बाह्यैव भवति। प्राकृतिकपदार्थतया तत्र सुखदुःखमोहोत्पादनशक्तिर्भवति। साङ्ख्यमतेन प्रकृतिः

भावरूपा न भवन्ति, अपि तु पदार्थरूपा एव । तेषाञ्चानुभूतिर्नानन्दमयी, अपि तु सुखदुःखमोहात्मिकां सीतारामरूपिणौ नटीनटौ यदा तदनुभावानां व्यभिचारिभावानाञ्चापि सफलमभिनयं सम्पादयः, तदा रंगेरससृष्टिर्भवति। रसस्य समग्रा विषयसामग्री.सीतारामौ, तदनुकर्तारौ नटीनटौ, तदीयाः शारीरिकचेष्टानां मनोविकाराणाञ्चाभिनयाः.. सर्वमेतत् प्राकृतं बाह्यञ्च अतस्तज्जन्‍ सत्वरजस्तमःसाम्यावस्थेति त्रिगुणत्मिका। तत्र सत्वं सुखरूपम्, रजो दुःखरूपम्, तमश्च मोहरूपम्। अतः प्रतिप्राकृतिकपदार्थ सुखदुःखमोहोत्पादनशक्तिर्भवति। अनया दृष्ट्या रसोऽपि यस्य विषयसामग्री प्राकृतिकी बाह्या वा भवति... पदार्थरूपः, त्रिगुणात्कमः, सुखदुःखमोहात्कश्चास्ति। अत्र सामग्रयां विभावा द्विदलादिव्यञ्जनानि, मूलपदार्थरूपाणि वा भवन्ति, अनुभावव्यभिचारिभावास्तेषां संस्कारकाः। इत्थं विभावदय एवानुभावव्यभिचारिसंस्कृता रसा निष्पद्यन्ते।

इयं स्थापना भरतमतविलक्षणा, स हि स्पष्टामाह..'स्थायिभावान् रसत्वमुपनेष्यामः' इति। स्थायिभावा एव रसत्वमापद्यन्त इति तदाशयः। व्याख्याकारोऽदीदं परिजानीते, परं स भरतस्य तं प्रयोगमौपचारिकं मत्वा स्वमन्तव्यं पोषयितुं प्रयस्यति स्म।अतो रत्यादयः स्थायिभावा रसस्य बाह्यसामग्रया (विभावादिरूपाया) उत्पन्ना आन्तरिकाः सुखदुःखमोहात्मकाश्च भवन्ति। अस्या रससामग्रयाः प्रेक्षणेन सामाजिकस्य चित्ते रतयादयः स्थायिभावा उत्पद्यते, ये स्वोत्पादकसामग्रयनुरूपतया सुखःदुखमोहात्मका एव भवन्ति। स्थायिभावा रसाधारा न भवन्ति, अपि तु प्रभावरूपाः। रसायो रसोऽपि प्राकृतपदार्थरूपस्त्रिगुणात्मकश्चैव। इतरप्राकृतपदार्थवत्तदास्वादोऽपि सुखदुःखमोहातमक एव, न केवलानन्दमयः। विभावादिना सहानुभावव्यभिचारिणोः संस्कार संस्कार्यसम्बन्धोऽत्र संयोगपदार्थः, सृष्टिर्निर्मितिर्वा निष्पत्तिपदार्थः। इत्थं सांख्यस्य सत्कार्यवादसिद्धान्तानुसारेणाभावे भावस्य कल्पना न भवति रससृष्टिः, अपि तु विद्यमानतत्वानां नवरूपे परिणतिरेव।

प्रस्तुतस्य मतस्य दोषास्तथा स्पष्टतराः, यथाभिनवगुप्तेन तस्य युक्तिपूर्वकं खण्डनमप्यनपेक्षिततयोपेक्षितम्। वस्तुतोऽत्र वयं रसस्य वस्तुपरकविवेचनस्य स्थूलतमं रूपं प्राप्नुमः। रसः किलात्र रंगोपस्थापितबाह्याभिनयमात्रम्, यत्र भावतत्वं प्रायो न भवति, व्यभिचारिभावा अप्यभिनीयमाना दृश्या एव भवन्ति। अतो मतमिदं भरतमतविरूद्धन्त्वस्त्येव, सहैव विवेकबलप्राप्तिशून्यमप्यस्ति। एतदनुसारेण नाट्यसरसाभिनयदर्शनेन सामाजिकाः स्वस्वप्रकृत्यनुरूपं सुखं दुःखं मोहं वाऽनुभवेयुः। इत्यञ्च प्रत्यक्षजीवनगतेऽनुभवे कलानुकृतौ च कोऽपि भेदो

न स्यात्, न प्रकृत्या, न गुणेन, न च मात्रया । कलानुभूतिश्च शुद्धेन्द्रियानुभूतिरूपा भवति।

## 3- अभिधावादः

भट्टनायकः भरतसूत्रस्य तृतीयः प्रमुखो व्याख्याकारो। भट्टनायकस्य अभिनवगुप्तेनाभिनवभारत्यां ध्वन्यालोकलोचने चेत्युभयत्रैवैतन्मतं सविस्तरं सादरञ्च विवेचितम्, पर खण्डनात्मकस्वरेणैव। अस्याचार्यो भट्टनायको भुक्तिवादी। तन्मतस्याशयोऽयम्—रसस्य निष्पत्तिर्नानुकार्ये रामादौ भवति, न चानुकर्तरि नटे। तौ तु द्वावपि तटस्थौ। न तु तौ रसमनुभवतः, वस्तुतो रसमनुभवति सामाजिकः।

आचार्यमम्मटपादानां शब्देषु तदीयः सिद्धान्तः प्रस्तूयते—

'न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिधातोद्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः सीयी, सत्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्वेन भोगेन भुज्यते' इति।

भट्टनायकस्यायं भुक्तिवादः सांख्यसिद्धान्तश्रितः।

सुखदुःखादिका वस्तुतोऽन्तःकरणस्य धर्माः न चात्मनः, परं पुरुषांतः—करणसम्बद्धत्वात् तेषाम्, पुरुषे तेषां (सुखदुःखादीनाम्) प्रतीतिरौपाधिकी भवति, एवमेव रसः परमार्थतः सामाजिके, न स तूपभुनक्ति सम्। एतद्द्विधसादृश्यस्येह दर्शनात् सिद्धान्तो भट्टनायकस्य सांख्यसिद्धान्तपरको मतो भवति।

अभिनव भारत्याम् भट्टनायकस्त्वाह..'रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं स्यात्। न च सा प्रतीतिर्युक्ता सीतादेरविभावत्वात्। स्वकान्तास्मृत्यसंवेदनात्। देवतादौ साधारणीकरणायेग्यत्वात्। समुद्रलङ्घनादेरसाधारण्यात्।'

'नच तद्वतो रसस्य स्मृतिरनुपलब्धत्वात्। न च शब्दानुमानादिभ्यस्तत्प्रतीतौ लोकस्य सरसता युक्ता प्रत्यक्षादिव। नायकयुगलावभासे हि प्रत्युत लज्जाजुगुप्सास्पृहादिस्वोचितवृत्यन्तरोदयः। अव्यग्रतयाऽऽकाशरसत्वमपि स्यात्। तन्न प्रतीतिरनुभवस्मृत्यादिरूपा रसस्य युक्ता। उत्पत्तावपि तुल्यमेतद् दूषणम्।'

'शक्तिरूपत्वेन पूर्वं स्थितस्य पश्चादभिव्यक्तौ विषयार्जनतारतम्यापत्तिः।

स्वगतपरगतत्वादि च पूर्ववद् विकल्प्यम्।

'तस्मात्काव्यं दोषाभावगुणालंकारमयत्वलक्षणेन नाट्ये चतुर्विधाभिनयरूपेण निबिडनिजमोहसंकटतानिवारणकारिणा विभावादिसाधारणीकरणात्मना अभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसोऽनुभवस्मृत्यादिविलक्षणेन रजस्तमोऽनुवेधवैचित्र्यबलाद् द्रुतिविस्तारविकासलक्षणेन सत्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्तिलक्षणेन परब्रह्मास्वादसविधेन भोगेन परं भुज्यते इति।'

ध्वन्यालोकलोचनेऽपि भट्टनायकमतं प्रायो द्वात्रिंशता पङ्क्तिभिर्विवेचितद्। परन्तत्र मुख्यतया खण्डनमेवास्ति.. भट्टनायकसिद्धान्तानुवादस्तु भृशमल्पतरः, अभिनवभारत्यास्तस्मिन्नास्ति काचिन्नवीनतापि। अतस्तदुद्धरणं प्रस्तुतसन्दर्भे न लाभविशेषकरम्।

आम्, काव्यप्रकाशीयमुद्धरणं नूनमुपयुज्यते। अतिसंक्षिप्तमपि तदभिनवभारत्या उद्धरणान्मार्मिकस्थलद्वये भिन्नम्, अयं भेदश्च भट्टनायकमतव्याख्यायां नूनं योगदानं विधत्ते...

'न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते नाभिव्यज्यते। अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः सीयी सत्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्वेन भोगेन भुज्यते।' इति। भट्टनायकमतस्य द्वौ पक्षौ स्तः..निषेधपक्षो विधिपक्षश्चैव।

निषेधपक्षः..निषेधपक्षे स रसस्य प्रतीतिमुत्पत्तिमभिव्यक्तिच्च निषेधति। प्रतीत्युत्पत्त्योः प्रायः समान एव फलितार्थः, तयोश्च लोल्लटमतेन सम्बन्धः। अभिव्यक्तेस्त्वानन्दवर्धनस्य ध्वनेर्व्यञ्जनाया वा सिद्धान्तेन, यो भट्टनायकस्य सर्वथवाग्राह्य आसीत्। तत्र प्रतीतिवादेऽयं प्रथमः प्रश्नः.. यदियं प्रतीतिः परगता वा भवति स्वगता वा? यदि सा परगता अनुकार्यस्य नटस्य वा रसप्रतीतिर्भवतीति तदा सामाजिकस्य तया कः सम्बन्धः? यदि च सा स्वगता, सामाजिकस्यैवैषा रसप्रतीतिर्भवतीति तदाऽनेके प्रत्यूहा उपस्थिता भवन्ति। प्रतीतेर्हि द्वे रूपे सम्भवतः प्रत्यक्षं परोक्षञ्चेति। रसप्रतीतेः प्रत्यक्षत्वे स्वीकृते करुणदिरसेषु नायिकानायकयोः शोके सामाजिकेनापि शोकोऽनुभविष्यते, अपरत्र श्रृंगारादिरसेषु च परकीयायाः प्रेमक्रीडायाः साक्षात्कारेण सहृदयस्य चित्ते लज्जाजुगुप्सादयो भावा उदेत्य चित्तस्याव्यग्रतां तन्मयतां वा नाशयिष्यन्ति, येन रसानुभूतिसम्भावनापि न शेषिष्यते। वस्तुतस्तित्वत्थं न भवति प्रेक्षको हि न दुःखमनुभवति न च लज्जादिकम्। स्पष्टानि चास्य कारणानि प्रथमं तावत्प्रेक्षको वास्तविकसीतारामौ.. याभ्यां सुखदुःखे अनुभूते..तौ न साक्षात्करोति। तौ च रसस्य विभावौ न स्तः,

सीतारामयोः कल्पनात्मकरूपे नटीनटावेव रसस्य विभावौ स्तः, अत एव प्रतीतेः प्रत्यक्षत्वाद् दुःखाद् दुःखस्य रतिक्रीडायाश्च लज्जादेरूदयस्य प्रश्न एव नोदेति। वास्तविककारणाभावे कार्यस्य वास्तविकत्वं कथं स्यात्। प्रेक्षकस्य स्वकान्तास्मृतेः सम्भवादपि तन्नोपपद्यते, तादृशस्मृत्यापि चित्तसमाहितेर्नाशात्। अपि च काव्यगते विभावे सीतापार्वत्यादौ सहृदयसय पूज्यत्वबुद्धया तत्र सामान्यकान्तात्वमपि न संगच्छते, यत्रास्य रतिभावोदयः स्यात्।पुनश्चव अलौकिकेषु कार्येषु का गतिः स्यात्। हनुमतः समुद्रलङ्घनादेः प्रतीतिः कथं भवेत्। अलौकिकैरसाधारणैश्चव पात्रैः साधारणीकरणस्यासम्भवात्। अतो रसप्रतीतेः प्रत्यक्षत्वमसिद्धम्। परोक्षप्रतीतिरपि द्विविधा शब्दार्थज्ञानम्, स्मृतिश्चेति। अनयोः शब्दार्थज्ञाने तु साक्षात्कारात्मकानुभूतेः सम्भावनापि नास्ति। अर्थबोधमात्रे हि नास्वादसम्भवः। स्मृतेः कल्पनाप्यपार्था। स्मृतिर्हि प्रत्यक्षदृष्टस्यानुभवस्यैव वा सम्भवति। रावणकारागारे शोकसन्तप्ता सीता, तद्विरहकातरतरो वा रामोऽस्माभिर्न दृष्टः। अतः कथं तौ स्मरिष्यामः। इति रसप्रतीतेः परोक्षत्वमप्यसिद्धम्।

उत्पत्तिवादेऽपि तावदिमे समेतर्का यथावत्प्रस्तोतुं शक्यन्ते। अथाभिव्यक्तिवादोऽवशिष्यते तत्रापि पूर्वं परगतत्वस्वगतत्वप्रश्नः समुदेति यद्यस्य रसस्यानुकार्यस्य नटस्य वा चित्तेऽभिव्यक्तिः स्वीक्रियेत तदा पुनस्तदेवौत्तरं स्यात्सहृदयस्य कृते सापार्थेव स्यादिति यदि चेयं रसस्याभिव्यक्तिः सहृदयहृदये भवतीति मन्येत तदा विभावादिष्वभिव्यञ्जककारणेषु न्यूनाधिमतवाभ्यां रसाभिव्यक्तावपि तारतम्यं कल्पनीयं भवेत्। यथाभिव्यञ्जकदीपादिप्रकाशप्रखरत्वाप्रखरत्वयोः पदार्थरूपाभिव्यक्तावाधिक्यनैयून्ये भवतस्तथा काव्येऽप्यभिव्यञ्जकविभावादिशक्तितारम्येन रसाभिव्यक्तितारतम्यमपि सिद्धयेत्। रसाखण्डत्वबाधकत्वात्तु तदमान्यम्। अतो रसाभिव्यक्तिकल्पनापि न संगच्छते।

विधिपक्षः... भट्टनायकमतेन रसभुक्तिर्भवति। स्वमतसिद्धये चायं काव्यस्य व्यापारत्रयं कल्पयति..अभिधाभावकत्वभोजकत्वभेदात्।

अभिधा शब्दार्थयोः सामान्यः प्रथमो वा व्यापारः। अनया काव्ये शब्दार्थबोधो भवति। अभिधाव्यापारः काव्ये, इतिहासपुराणयोः, शास्त्रादिषु च सर्वत्र सामान्येन व्याप्तः। प्रसिद्धञ्चेदमस्य स्वरूपमिति भट्टनायकेनैतन्न विवेचितम्।

अपरस्तु व्यापारो भावकत्वं नाम। काव्यनाट्ययोरवास्य सत्वम्। काव्ये दोषाभाव...गुणालंकारसद्भावाभ्यां, नाटके च चतुर्विधाभिनयेन शास्त्रादिव्यतिरिक्ता प्रभावक्षमतोदेति। शास्त्रादौ शब्दार्थभ्यामभिधया यत्र केवलार्थबोधो भवति, तत्र काव्ये भावकत्वबलेन कतिपयेषामितरविशेषाणां

समावेशः स्यात्। यथा.....सहृदयचित्तस्थव्यक्तिगतरागद्वेषजन्याज्ञाननिवृत्तिः, सहृदयचित्तस्य व्यक्तिगतरागद्वेषमुक्तत्वमित्यर्थः। आनन्दानुभूतिप्रमुखप्रतयूहभूतस्वपरभावनातत्कालापसरणम्। विभावादिसाधारणीकरणम्। भावकत्वव्यापारस्यायमेव मुख्यो गुणः। अन्ततश्चैव रसस्य भावितत्वम्। यथा मम्मटोद्धरणे स्पष्टम् स्थायिभावो भावितः सन् रसरूपे विपरिवर्तत इत। इयमेव रसनिष्पत्तिः। स्थायिभावस्य भावितत्वेव निष्पत्तिपदार्थः। अत्र भावितशब्दस्यार्थो विचारणीयः। काव्यप्रकाशीयानेकटीकाश्रयेणाचार्यविश्वेश्वरोऽस्य शब्दस्य साधारणीकृत इत्यर्थमाह। किन्तु डाक्टरप्रेमस्वरूपगुप्तोऽनयोर्भेदं प्रत्यपादयत्.... भावकत्वव्यापारेण भाविता भवन्तीति भट्टनायकः। तस्य भावनमेवाभिप्रेतम्, न साधारणीकरणम्। अनयोः किमन्तरमिति तेन न स्पष्टी कृतम्। मोनियरविलियम्सादिकोशेषु,'भावनशब्दस्यानेकेऽर्थाः सङ्गृहीताः..प्रसंगानुकूलास्तु तेषु द्वित्रा एव। यथा चिन्तविषयीभावः, कल्पनाविषयीभावः, व्यक्तीभाव इत्यादयः। अमीषु द्वितीयोऽर्थ कल्पनाविषयीभाव इत्येव भट्टनायकाभिमतस्य भावकत्वव्यापारस्य सन्निहिततमोऽर्थः, अत एवाधुनिकशब्दावल्यां 'कल्पनात्मकप्रतीतिः' स्थायिभावभावनं वेत्यस्यार्थः। भावकत्वव्यापारफलतया रत्यादिप्रत्यक्षप्रतीतेः कल्पनात्मकप्रतीतौ परिणतिरिति यावत्। वयमत्राधुनिकीं शब्दावलीमेव प्रयुञ्ज्महि, न प्राचीनाम्। परिणामतः स्थायिभावस्य कल्पनात्मकप्रतीतिः, साधारणीकरणं वेत्युभयत्र न कोऽपि भेदः। व्यक्तिबद्धा प्रत्यक्षप्रतीतिर्हि कल्पनाविषयीभूय स्वतन्त्रा साधारणीकृतैव च भवति। कल्पनायाः कार्य बिम्बनिमार्णणम्। बिम्बरूपे च जाते विशिष्टानुभूतिर्व्यक्तिसंसर्गमुक्ता सती सर्वगम्या भवाति।

इत्थं भावकत्वव्यापारस्य कारणम्... शब्दार्थयोर्दोषाभावः, गुणालंकारसद्भावश्चैव। आधुनिक्यां शब्दावल्यां कलपनातत्वस्य समावेशः। कार्यञ्च काव्यसामग्रीसाधारणीकरणम्। परिणामतः सहृदयचित्तस्य व्यक्तिसंसर्गेभ्यो मुक्तिः (शब्दान्तरेषु चित्तवैशद्यम्) अन्ते चास्या द्विविधायाः प्रक्रियायाः फलतया सहृदयस्थायिभावस्य भावितीभूय रसत्वे परिणतिः।

तृतीयो व्यापारोस्ति भोजकत्वं नाम। भावकत्वेन सिद्धं रसं सहृदयो भोजकत्वेनैव भुङ्क्ते। अयं भोगोऽनुभवस्मृत्यादिप्रत्यक्षसकललौकिकप्रतीतिविलक्षणः। तत्र सत्वोद्रेकेण हि सहृदयहृदयं चिन्मयप्रकाशपरिपूर्णतयाऽऽनन्दमयं भवति, तथापि तस्मिन् रजस्तमोमिश्रणेन द्रुतिविस्तारविकासस्थितयोऽपि राजन्ते। वस्तुतो निज संविद्विश्रान्तिरूपेयमात्मसाक्षात्कारावस्था ब्रह्मास्वादसहोदरा। तत्सहोदरैवेयं न तद्रूपा रजस्तमःस्पर्शसम्भिन्नत्वात्।

रसस्तावद् भोग्योऽयमास्वाद्यो वा, न त्वास्वादः। भावितः कल्पनाविषयीभूतो वा सहृदयस्य स्थायिभावो रसो भवति, ततः सहृदयस्तस्य भोगमानन्दमयमास्वादनं वा करोति। अत्र मते रसः सहृदयस्य सन्निहिततरो भवति। स हि तस्य स्वस्थायिभावस्यैव कल्पनात्मिका प्रतीतिः। परं नाद्यपि सा प्रतीतिरानन्दमय्याश्चेतनाया रूपं गता, अपितु तस्या विषयभूतैव (रसानन्दयोर्नाभेदसम्बन्धः, अपितु कारणकार्यसम्बन्ध एव) अतोऽस्यां रसकल्पनायामपि वस्तुतत्त्वं विषयतत्त्वं वा विद्यते..इति नात्र सन्देहः। इत्थं भट्टनायकस्य दृष्टिराचार्यान्तरेभ्यो व्यक्तिपरकतराऽऽत्मपरकतरा सत्यपि नूनमभिनवापेक्षया वस्तुपरकैव।

एतद्विवेचनाधारेण भावितत्वं भावितिर्वा निष्पत्तिपदार्थः विभावादिसंयोगेन स्थायिभावो भावितः सन् रसरूपतया परिणमति। इयमेव रसनिष्पत्तिः। विभावादयो भावनक्रियाकारणानि भावकावा भवन्ति। स्थायिभावश्च भाव्यः। अतो भावकभाव्यसम्बन्ध इति संयोगपदार्थः। परम्परोक्तो भोजकभोज्यसम्बन्धस्तावत् सिद्ध्यति। स्थायिभावस्य भावितिरेव हि रससिद्धिस्तन्निष्पतिर्वा। अस्य सिद्धस्य निष्पन्नस्य वा रसस्य सहृदयेन भुक्तिर्निष्पत्तयनन्तरा क्रिया। एवं सहृदयचित्तं रसस्थानम्। कतिपये विद्वांसो मन्यन्ते यद् भट्टनायकः शब्दार्थयो रसस्थितिं मन्यते। वयमपि पूर्वं तदेवावाधारयाम, वस्तुतस्तत्र नास्ति सारः। अभिनवभारतीप्रभृतिषु ग्रन्थेषूद्धृतस्य भट्टनायकमतस्य विश्लेषणेनाभिगकृततत्खण्डनेन चेयं धारणा नूनं निराक्रियते। उपर्युक्तोद्धरणाधारेण भावकत्वभोजकत्वे शब्दार्थव्यापारौ स्तः। भावकत्वेनैकतो विभावादिसाधारणीकरणम्, अपरतश्च सहृदयहृदयवैशद्यं... तस्यव्यक्तिसंसर्गमुक्त्वं सिद्ध्यति, एतद्द्वयफलतया, स्थायिभावो भावितः सन् रसरूपतया परिणमति। अत्र द्वयं निष्कृष्यते..शब्दार्थौ न भोगविषयावित्येकम्, शब्दार्थयोर्हि भावकत्वभोजकत्वाख्यौ व्यापारौ रसस्य भावनं भोगं च कारयतः। अतः शब्दार्थयोर्हेतुमात्रत्वम्। अपरन्तु भोगस्य विषयो रसः, रसश्च भावितः स्थायिभावः। अन्ततः स्थायिभावः एव भोगविषयः। स्थायिभावश्च व्यक्तावेव भवति। न शब्दार्थयोः शब्दार्थौ तु तत्र माध्यममात्रं प्रतीकमात्रं वा न त्वाधारः, अव्यक्तिगतस्य सामान्यस्य वा स्थायिभावस्यापि कविरेवाधारो न शब्दार्थौ, कविरेव हि लोकानुभवाधारेण स्ववासनाबलेनानुभूयः शब्दार्थमाध्यमेन तं प्रकाशयति। एवंस्थिते रसाधारोऽपि शब्दार्थौ काव्यं वा न सम्भवति, काव्ये रसस्थितिरुपचारेणैव सिद्ध्यति। अथायमुदेति प्रश्नो यत्स्थायिभावपदेन भट्टनायकस्य किमभिप्रेतिमिति? कस्यायं स्थायिभावः? भरतलोल्लटशङ्कुकप्रसंगेषु स्थायिभावस्य प्रायो विषयगतत्वेनैव कल्पनास्तीति वयमपश्याम। भरतस्य लोकगतः स्थायिभावः, लोल्लटस्यानुकार्यगतः

स्थायिभावः शङ्कुकस्य च मूलतोऽनुकार्यगतः प्रत्यक्षतश्चैव नटगतः स्थायिभावोऽभिप्रेतः। स्थायिभावस्यामूनि त्रीण्यपि रूपाणि सहृदयदृशा विषयगतानि, स नाट्योपस्थापितानामेषामास्वादं करोति, नानुभवम्। भट्टनायकोऽपि स्थायिभावस्य भोगमेव प्रतिपादयति, किन्तु तस्य स्थायिभावो न विषयगतः.. निबिडनिजमोहसंकटतानिवारणकारिणा, इत्यत्र निजशब्देन स्पष्टीक्रियते सत्सहृदयं व्यक्तिगतरागद्वेषमुक्तं सत्त्वस्थायिभावस्य साधारणीकृतं रूपमास्वादयति.. रागद्वेषमुक्तेन चित्तेन स्वकीयस्य शुद्धस्थायिभावस्यायमनुभवो वाऽऽस्वादनमेव रसः।इदमेव तथ्यमभिनवेन भट्टनायकमतनिरासायोद्धाटितम्। तस्यायं तर्कः येन भावितिः साधारणीकरणं वा साध्यते तेनैव रसभोगोऽपि साध्येत, अतो भोजकत्वव्यापारकल्पनागौरवं निरर्थकत्वादनपेक्षितम्। इत्थं सहृदयस्थायिभाव एव भट्टनायकस्य स्थायिभावत्वेनाभिप्रेतः..सहृदयो भावकत्वव्यापारेण स्वगतस्थायिभावं साधारणीकृतरसरूपेणानुभवति, पुनश्चैवं सिद्धं रसं भोजकत्वव्यापारेण, भोगविषयीकरोति, भट्टनायकस्य मतेन रसस्य स्थानं सहृदयहृदयमेव न शब्दार्थौ, काव्यस्य भावकत्वभोजकत्वव्यापारयोः क्रियाभूमिस्तदेव।.अभिनवेन भट्टनायकमतविरोधेऽनेकधाऽऽक्षिप्तम्। प्रथमन्तु रसतद्भोगयोरन्तरमेवाभिनवगुप्तस्य नाभिमतम्। भावितस्थायिभाव एव रस इत्यत्र न तस्य विप्रतिपत्तिः। सोऽपि मन्यते..'सर्वथा रसनात्मिकया वीतविघ्नया वा प्रतीत्या ग्राह्ययो भाव एव रसः'। परमयं भावोऽन्तत आस्वादात्मक एव जायते। अतो भट्टनायकेन कल्पितमास्वाद्यास्वादयो रसतद्भोगयोरन्तरं सर्वथाऽसंगतमेवेति।

अपरश्चैवायमाक्षेपो यदिदं प्रतीतिभुक्त्योरन्तरमपि मिथ्यैव, भुक्तिरपिप्रतीतिरेव, प्रतीतिं विा हि न कश्चिदपि, व्यवहारः सम्भवति। अतो रसप्रतीतिं निरस्य रसभुक्तिस्थापनमसंगतम्।

तृतीयश्चायमाक्षेपो यद्भट्टनायकप्रस्तुतस्य भोगस्वरूपस्य व्याख्या न तात्विकी। तदनुसारेण 'सत्वोद्रेके चित्तस्यात्मविश्रान्तिः प्रकाशनन्दमयी तु भोगपदार्थोऽस्ति, परं रजस्तमोऽनुबन्धेन तस्यां स्थितावपि चित्ते द्रुतिविस्तारविकासप्रवृत्तयो भवन्तीति तावदभिनवस्यानभिमतम्। तस्यायं तर्को यथा यावन्तो रसास्तावत्यस्तत्प्रतीतयः, सम्भवन्ति, नैतावदेव, सत्वादिगुणानुपातभेदेन प्रतिभावानुभूति चित्तदशा भिद्यन्ते, अतो रसास्वादने द्रुतिविस्तारविकासाख्यास्तिस्र एव दशाः कथ मान्याः स्युः ? अत्र का त्रित्वेनेयत्त, इतयस्याचार्यविश्वेश्वरोऽभिधाभावकत्वभोजकत्वाख्या व्यापाराः कथं मन्यन्ते इत्यर्थमाह। न तत्समीचीनम्। अत्र त्रित्वेनेत्यस्याभिप्रायो डाक्टरप्रेमस्वरूपमतं यथा द्रुत्यादीनां तिसृणां दशानामेव पक्षे सम्भवति, अभिधादिव्यापारत्रयचर्चा नूनमिहांप्रासंगिकी।

चतुर्थस्त्वाक्षेपोऽयम्, यद्रसस्योत्पत्यभिव्यक्त्योरनभिमत्वे तस्य नित्यत्वमसत्व वा स्वीकरणीयं स्यात् नित्यस्यानुत्पत्तेः, असतश्चानभिव्यतेः। अयं तर्कस्तावदित्थमपि शक्यते प्रस्तोतुम्....यदीदृशी नास्त्येव सत्ता, या नोत्पद्यते नाप्यभिव्यज्यते। सतो ह्यभिव्यक्तया भव्यम्, असतश्चोत्पत्या। जगति विद्यमानानां तत्वानां सत्वस्य कल्पनोक्तयोः पद्धत्योरन्यतरया प्रमाण्ये। दर्शनानां सदसत्कार्यवादसिद्धान्तयोरुद्भावनाऽनयोरेव सिद्धये सम्पन्ना। अतो रसस्योत्पत्यभिव्यक्त्योरुभयोरपि प्रतिषेधे रससत्तैव प्रतिषिद्ध्येत।

अन्ते च भावकत्वभोजकत्वयोः कल्पनां शास्त्रीयप्रमाणाभावो बाधते, अनयोश्च कार्यं प्रमाणसिद्धया व्यञ्जनयैव कृतं स्यात्।

शक्तिः.. रससिद्धान्तविकासे भट्टनायकस्य योगोऽतिमहत्वं भजते। तस्य सीमानःसन्तु तर्कशास्त्रीया युक्तस्य एव केवलम्। परं तस्योद्भावनानां व्यावहारिकं महत्वं भारतीयकाव्यशास्त्रेऽद्याप्यक्षुण्णमेव।

रसास्वादस्वरूपस्य तात्त्विक्या व्याख्याया यशः सर्वप्रथमं भट्टनायकमेव श्रयते। ततः पूर्वं काव्यास्वादप्रसंगे, हर्ष इति भरतः, प्रीतिरिति भामहवामनौ, आह्लादइत्यानन्दवर्धनः, चमत्कार इति लोल्लटः, आनन्द इति घनञ्जयः एवमादिशब्दा एव सामान्येन प्रायुज्यन्त रसास्वादे रसभोगे वा। परं रसास्वादस्वरूपं तदवधि केनापि विश्लेषितं नाभूत्। भट्टनायकेनेदंप्रथमतयाऽस्यां दिशि सफलं प्रयतितम्। रसास्वादः काव्यानन्दो वा नाम चित्तस्यात्मविश्रान्तिः। इयं च विश्रान्तिः सत्वोद्रेके भवति। यदा रजन्तमसी शाम्यतुः, परं सर्वथा न क्षीयेते। इयं विशुद्धात्मविश्रान्तिः हीनतरत्वाद्ब्रह्मास्वादसविधवर्तिनीत्युच्यते न तद्रूपा। इत्थमात्मानन्दात् ब्रह्मानन्दाद्वास्य साम्यवैषम्यस्पष्टयता काव्यास्वादस्य रसास्वादस्य वा स्वरूपं भट्टनायकेनैवेदंप्रथमतया निर्णीतम्। इदञ्च मतमन्तं यावद् यथावन्मान्यतां गतम्।

## 4-अभिव्यक्तिवादः

भरतसूत्रस्य चतुर्थः सर्वप्रमुखो व्याख्याकारोऽस्ति आचार्योऽभिनवगुप्तः। अस्त्ययम् अभिव्यक्तिवादी। अभिव्यक्तिवाद

आचार्यानन्दवर्धनध्वनिवादिनः सिद्धान्तमालम्बते। सः प्रकृतप्रसङ्गे ब्रवीति.......

सामाजिकगतः स्थायिभाव एव रसानुभूतेर्निमित्तम् वासनां वा संस्कारे गतो रतिशोकादिस्थायिभावः सामाजिकस्यात्मानमधितिष्ठति। सः साधारणीकृतत्वेननोपस्थितविभावादिसामग्र्याभिव्यक्तो भवति तन्मयीभावत्वाद् वेद्यान्तरसम्पर्कशून्यब्रह्मानन्दस्वादसंकाशोऽनुभूयते सः। उद्भावितात्मस्वरूपो भूत्वा रसोऽवतरतीत्येतद् ज्ञापयति आचार्योऽभिनवगुप्तः। स रसोत्पत्तिमुद्दिश्य सविस्तरं विमृश्य भट्टलोल्लटादीनां मतानि सम्यगालोच्य स्वसिद्धान्तं स्थापयाम्बभूव। तदीयस्याखिलविवेचनस्य केन्द्रबिन्दुरस्ति सामाजिकस्य रसानुभूतिः। अस्मिन्नेव निकषे सः परमतानि समीक्षमाणो दृश्यते।

भट्टलोल्लटः स्वमते सामाजिकस्य रसानुभूतौ न चर्चां कामपि कुर्वाणः प्राप्यते। अतोऽनुपादेयतायाः प्रत्याख्यानाख्यानर्हतायाश्च दृष्ट्या तत्र सर्वप्रथमं विचारो विहितोऽस्ति। शङ्कुकस्य मतमपि नोपादेयं तस्यानुमितिरूपत्वात्।, तत्र साक्षात्कारात्मकत्वस्याभावो वर्तते। तदीयमतमिदं द्वितीयस्मिन् सोपाने स्थापितं कृतमस्ति। भट्टनायकस्य मते रसानुभूतिं सामाजिककृतसाक्षात्कारात्मकानुभवरूपत्वेन प्रस्तुतीकर्तुं भरतसूत्रस्य चतुर्थः सर्वप्रमुखो व्याख्याकारोऽस्ति आचार्योऽभिनवगुप्तः। अस्त्ययम् अभिव्यक्तिवादी। अभिव्यक्तिवाद आचार्यानन्दवर्धनध्वनिवादिनः सिद्धान्तमालम्बते। सः प्रकृतप्रसङ्गे ब्रवीति.......

सामाजिकगतः स्थायिभाव एव रसानुभूतेर्निमित्तम् वासनां वा संस्कारे गतो रतिशोकादिस्थायिभावः सामाजिकस्यात्मानमधितिष्ठति। सः साधारणीकृतत्वेननोपस्थितविभावादिसामग्र्याभिव्यक्तो भवति तन्मयीभावत्वाद् वेद्यान्तरसम्पर्कशून्यब्रह्मानन्दस्वादसंकाशोऽनुभूयते सः। उद्भावितात्मस्वरूपो भूत्वा रसोऽवतरतीत्येतद् ज्ञापयति आचार्योऽभिनवगुप्तः। स रसोत्पत्तिमुद्दिश्य सविस्तरं विमृश्य भट्टलोल्लटादीनां मतानि सम्यगालोच्य स्वसिद्धान्तं स्थापयाम्बभूव। तदीयस्याखिलविवेचनस्य केन्द्रबिन्दुरस्ति सामाजिकस्य रसानुभूतिः। अस्मिन्नेव निकषे सः परमतानि समीक्षमाणो दृश्यते।

भट्टलोल्लटः स्वमते सामाजिकस्य रसानुभूतौ न चर्चां कामपि कुर्वाणः प्राप्यते। अतोऽनुपादेयतायाः प्रत्याख्यानाख्यानर्हतायाश्च

दृष्ट्या तत्र सर्वप्रथमं विचारो विहितोऽस्ति। शङ्कुकस्य मतमपि नोपादेयं तस्यानुमितिरूपत्वात्।, तत्र साक्षात्कारात्मकत्वस्याभावो वर्तते। तदीयमतमिदं द्वितीयस्मिन् सीाने सीापितं कृतमस्ति। भट्टनायकस्य मते रसानुभूतिं सामाजिककृतसाक्षात्कारात्मकानुभवरूपत्वेन प्रसतुतीकर्तुं रसस्यानन्दरूपताया निर्भ्रान्तं विवेचनं सर्वतः प्रथमं भट्टनायकेनैव कृतम्, आत्मविश्रान्तेः साधारणीकरणस्य च सिद्धान्तेन तेन करुणादिरसानामानन्दरूपताऽप्यतिप्रामाणिकतया साधिता।

भट्टनायकस्य चेयं सर्वोत्कृष्टोपलब्धिः यत्साधारणीकरणं नाम। काव्यास्वादनस्य ह्ययं मौलिकः प्रश्नो यत्काव्येऽभिव्यक्ता व्यक्तिभावाः..कवेः कविनिबद्धस्य वा पात्रस्य..सहृदयस्य कथमास्वाद्या भवन्ति। नैकस्यैव सहृदयस्य, अपितु कृत्स्नस्य सहृदयसमाजस्य। इत्यस्य प्रश्नस्य सर्वतः प्रथमं सामाधानं भट्टनायकेन साधारणीकरणसिद्धान्तोद्भावनया कृतम्। अयं प्रश्नो वस्तुतः साहित्यालोचनस्य मूलाधारः। भट्टनायकेन चास्य समाधानं प्रस्तूयालोचनाशास्त्रेतिहासेऽभूतपूर्वा सिद्धिरर्जिता। विश्ववंस्यालोचनाशस्त्रे भट्टनायकात्पूर्वमस्येदृशं प्रामाणिकं समाधानं केन्याप्याचार्येण नोपस्थापितमिति मे धारणा।इत्थं पूर्ववर्तिनामाचार्याणां व्याख्यातॄणां वा मतानि परीक्ष्याभिवगुप्तेन स्वमतं प्रतिष्ठापितम्। इदमत्र ज्ञातव्यं यत्तेनोपर्युक्तालोचनार्थं खण्डनशब्दं प्रतिविषध्य संशोधनशब्दो व्यवहृतः। तेनोक्तम्... अस्माभिर्वृत्तपूर्वाणां विदुषां विचारान् परीक्ष्य संशोधितान्येव न खण्डितानि।पूर्वप्रतिष्ठापितयोजनासु हि मूलप्रतिष्ठा फलमामनन्ति। इति तस्येयमुक्तिः काव्यशास्त्राचार्यजनमतमूल्यांकनेऽतिमहत्वमाधत्ते। शास्त्रस्य काव्यशास्त्रस्य वा त एवोद्भावका आचार्या न सन्ति, यैर्नूतनाः सिद्धान्ता आविष्कृताः, यैसते आख्याताः पुनराख्याता वा ते गम्भीर चेतसोऽप्याचार्यास्तस्यामेव कोटौ निविशन्ते। स्वयमभिनवगुप्तविषयेऽपीदमेव तथ्यम्। अभिनवस्य रसनिष्पत्तिविषयका विचारा अभिनवभारत्याम् ध्वन्यालोकलोचने चेत्युभयत्र लभ्यन्ते। वस्तुतः प्रस्तुतः प्रस्तुतप्रसंगविवेचनं लोचने स्पष्टतरम्, ध्वनिसन्दर्भे व्यञ्जनाप्रसंगे वा तेन निष्कर्षितुमवसरविशेषोऽधिगतः।

अभिनवभारत्या'तत्काव्यार्थो रसः काव्यात्मकादपि शब्दादधिकारिणोऽधिकास्ति प्रतिपत्तिः। अधिकारी चात्र विमलप्रतिभानशालिहृदयः। तस्य च ग्रीवाभंगाभिराममिति, उमापि नीलालक इति, हरस्तु किञ्चिद् इत्यादिवाक्येभ्यो वाक्यार्थप्रतिपत्ते रनन्तरं मानसी साक्षात्कारात्मिका अपहृसिततद्वाक्योपात्तकालादिविभागा तावत्प्रतीतिरुपजायते।'

'तस्यां च यो मृगपोतकादिभाति तस्य विशेषरूपत्वाभावाद् भीत

इति, त्रासकस्यापारमार्थिकत्वाद् भयमेव परं देशकालाद्यनालिंगितं, तत एव भीतोऽयं भीतोऽहं शत्रुर्वयस्यो मध्यस्थो वेत्यादिप्रत्ययेभ्यो दुःखसुखादिकृतबुद्ध्यन्तरोदयनियमत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं , साक्षादिव हृदये निविशमानं, चक्षुषोरिव विपरिवर्तमानं भयानको रसः। तथाविधे हि भये नामात्यन्तं निरस्कृतो न विशेषत उल्लिखितः। एवं परोऽपि।'

'तत एव न परिमितमेव साधारण्यमपि तु विततम्। व्याप्तिग्रह इव धूमाग्न्योर्भयकम्पयोरिव वा। तदत्र साक्षात्कारायमाणत्वेन परिपोषिका नटादिसामग्री। यस्यां वस्तुसतां काव्यार्पितानाञ्च देशकालप्रमात्रादीनां नियमहेतूनामन्यान्यप्रतिबन्धबलादत्यन्तपमसारणे स एव साधारणीभावः सुतरां पुष्यति। अत एव सर्वसामाजिकानामेकधनतयैव प्रतिपत्तिः सुतरां रसपरिपोषाय। सर्वेषामनादिवासनाचित्रीकृतचेतसां वासनासंवादात्। सा चाविघ्ना संवित् चमत्कारः सर्वथा रसनात्मकवीतिविघ्नप्रतीतिग्राह्यो भाव एव रसः। तत्र विघ्नापसारका विभावप्रभृतयः।'

ध्वन्यालोकलोचने.....

'तस्मादनुत्थानोपहतः पूर्वपक्षः। रामादिचरितं तु न सर्वस्य हृदयसंवादीतिमहत्साहम्। चित्रवासनाविशिष्टत्वाच्चेतसः। यदाह... 'तासामनादित्वमाशिषो नित्यत्वात्। जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्।'इति। तेन प्रतीतिस्तावद्रसस्य सिद्धा। सा च रसनारूपा प्रतीतिरुत्पद्यते। वाच्यवाचकयोस्तत्राभिधाविविक्तो व्यञ्जनात्मा ध्वननव्यापार एव। भोगीकरणव्यापारश्च काव्यस्य रसविषयो ध्वननात्मैव, नान्यत्किञ्चित्। भावकत्वमपि समुचितगुणालंकारपरिग्रहात्मकमस्माभिरेव वितत्य वक्ष्यते। किमेतदपूर्वम्? काव्यञ्च रसान् प्रति भावकमिति यदुच्यते तत्र भवतैव भावनादुत्पत्तिपक्ष एव प्रत्युज्जीवितः। न च काव्यशब्दानां केवलानां भावकत्वम्, अर्थापरिज्ञाने तदभावात्। न च केवलानामर्थानाम्, शब्दान्तरेणार्प्यमाणत्वे तदयोगात्। द्वयोस्तु भावकत्वमस्माभिरेवोक्तम्। 'यत्रार्थः शब्दो वा तमर्थं व्यंक्त इत्यत्र। तस्माद् व्यञ्जकत्वाख्येन व्यापारेण गुणालंकारौचित्यादिकयेतिकर्तव्यतया काव्यं भावकं रसान् भावयति। इति त्र्यंशायामपि भावनायां करणांशे ध्वननमेव निपतति भोगोऽपि न काव्यशब्देन क्रियते, अपि तु घनमोहान्ध्यसंकटतानिवृत्तिद्वारेणास्वादापरनाम्नि अलौकिके द्रुतिविस्तरविकासात्मनि भोगे कर्तव्ये लोकोत्तरे ध्वनिव्यापार एव मूर्धाभिषिक्तः। तच्चेदं भोगंकृत्वं रसस्य ध्वननीयत्वे सिद्धे दैवसिद्धम। रस्यमानतोदितचमत्कारानतिरिक्तत्वाद् भोगस्येति। सत्त्वादीनां चांगाङ्गिभाववैचित्र्यस्यानन्त्याद् द्रुत्यादित्वेनास्वादगणना न युक्ता।

परब्रह्मास्वादब्रह्मचारित्वं चास्त्वस्य रसास्वादस्य। व्युत्पादनञ्च शासनप्रतिपादनाभ्यां शास्त्रेतिहासकृताभ्यां विलक्षणम्। यथा रामस्तथाहमित्युपमानातिरिक्तं रसास्वादोपायस्वप्रतिभाविजृम्भारूपां व्युत्पत्तिमन्ते करोतीति कमुपलभामहे। तस्मात्स्थितमेतत् अभिव्यज्यन्ते रसाः प्रतीत्यैव च रस्यन्त इति।

अभिनवमतस्य सारांशः—

सर्वथाऽऽस्वादात्मिकया निष्प्रत्यूहया च प्रतीत्या ग्राह्यो भाव एव रसः। नाट्यकाव्योपकरणैः साधारणीकृतः देशकालस्वपरव्यक्तिगतरागद्वेषादिचेतनामुक्तारत्यादयो भावा अस्वाद्याः सुखमयप्रतीतिविषया वा भवन्ति। अयमास्वादो भावस्तस्य च सुखमयी प्रतीतिरेव रस इत्यर्थः। अभिनवमतेन... शुद्धाद्वैतभावनादृष्ट्या..सुखमयी प्रतीतिरेव वस्तुतो रसः, परन्त्वस्याः, सुखमय्याः प्रतीतिर्विषयः..साधारणीकृतो.. भावोऽपि रस इति व्यपदेशमर्हति।'

रसास्वादने सहृदयस्यात्मा न सर्वथोपेक्ष्यते न च विशेषादुल्लिख्यते—रसप्रतीतिस्तु सहृदयस्यात्मन एव भवति, परमियं व्यक्तिगता न भवतीत्यर्थः।

इदं साधारणीकरणं न 'व्यष्टिरतरमात्रे, यावत्समष्टिस्तरेऽपि भवति। नाट्यकाव्योपकरणचमत्कारेणात्मतत्त्वाद्वैतत्वात्सर्वे सामाजिका भावस्य समानामेव प्रतीतिं प्रयन्ति। व्यक्तिगतसंसर्गैकान्ताभावादास्वादनं पूर्णतयाऽऽनन्दमयं भवति। अद्वैतवादिना भिनवगुप्तेन स्वकीये तन्त्रा लोकग्रन्थे सुष्ठु तावदियं समष्टिगता रसानुभूतिरुपवर्णिता।

स्थायिभावाः प्रतिसहृदयहृदयं संस्कारात्मना विद्यन्ते, संस्कारात्मकत्वाच्च से समाना अपि भवन्ति। अनादिसंस्कारचित्रितचित्तानां हि समेषां सामाजिकानां समाना वासना भवति।

काव्यात्मकाद् वाक्यात्सहृदयस्य वाच्यार्थबोधस्य सामान्यादधिका भवति प्रतीतिः। सामान्ये सहृदयसम्बन्धिनि चार्थबोधेऽयं भेदो भवति... यथास्य प्रतीतिर्वाक्यगतकालादिविभागमुक्ता— साधारणीकृता–भवति, साक्षात्कारात्मिका च भवति। यथा मनोनयनसमक्षं काल्पनिकं चित्रमिवांकृयते। आधुनिकशब्दावल्यामर्थबोधो धारणात्मको भवति। प्रतीतिश्चेयं बिम्बरूपेत्युच्यते।

शब्दार्थयोर्गुणलंकारोचितसन्निवेशोऽस्य वैशिष्ट्यस्याधारः। भट्टनायकोऽमुं भावकत्वव्यापारांग मन्यते। प्रतिव्यापारं त्रीण्यंगानि भवन्ति–कारणम्, फलम्, तदुभयमध्यर्तिनीतिकर्त्तव्यता चेति। अभिनवमतेन प्रस्तुतव्यापारस्य फलं साधारणीकरणम्, इतिकर्तव्यता समुचितगुणालंकारसन्निवेशः, करणञ्च ध्वननं व्यञ्जनै वास्ति, तदा किमनया

नवीनकल्पनया।

भोजकत्वस्य शक्तिस्तु शब्दार्थगतत्वेनैव मान्या तद्धि चित्तस्य व्यापारविशेषः। वस्तुतो रसास्वादभोगयोरुभयोः स्थितिरभिन्ना। शब्दार्थौ त्वेतत्क्रियाप्रेरकावेव। इयं शक्तिरपि चित्तेन व्यञ्जनाया एवासाद्यते। अनेन विभावादिसाधारणीकरणे जाते सहृदयस्य चित्तं निजमोहसंकटान्मुक्तं सद्भावभोगे समर्थ भवति। अतोऽस्मिन्नलौकिके कर्तव्येऽपि ध्वननव्यापार एव मूर्धाभिषिक्तोऽस्ति। व्यञ्जनैवात्र प्रधानकारणमस्तीत्यर्थः। रसस्य ध्वननीयत्वे स्वीकृते भोजकत्वं दैवसिद्धं स्यात्, तस्य पृथक्कल्पनमनावश्यकम्।

रसो ब्रह्मास्वादसमान इत्यभिनवस्याप्यभिमतम्।

रसस्याभिव्यक्तिरेव भवतीति निर्विवादम्। आस्वादात्मिकया निष्प्रत्यूहा च प्रतीत्या ग्राह्यः स्थायिभाव एव रसः, स्थायिभावश्चानादिवासनात्मकतया प्रमातृचित्तेऽवतिष्ठते। नाट्यकाव्ययोः प्रस्तुतविभावादिसम्पर्केणाभिव्यक्तः स रसनीयो भवति। रसत्वे वा परिणमति। इत्थं विभावादयो व्यञ्जकाः, रसरूपे परिणतः स्थायिभावो व्यंग्यएवेति वा। अतोऽभिव्यक्तिरिति निष्पत्तिपदार्थः, व्यंगयव्यञ्जक सम्बन्धश्च संयोगपदार्थः।

अभिनवस्याधारभूतं दर्शनं शैवाद्वैतमासीदिति निर्विवादम्। स च प्रत्यभिज्ञादर्शनप्रतिष्ठापकानामग्रणीत्वेन विख्यातः। भारतीये काव्यशास्त्रेऽन्ततोऽभिनवगुप्तस्यैव मतं माननीयमभूत्। शैवाद्वैतप्रतिपादितानन्दवादपरिपुष्टाधारेणाभिनवेन या किलात्मास्वादरूपस्य रसस्य प्रकल्पना विहिता, तया रससिद्धान्तः कार्त्स्न्येनावेष्टितः। येन भरतस्य मूलभूतः सिद्धान्तोऽपि तदाच्छन्नोऽभूत्। परवर्तिनश्चाचार्या भरतं विस्मृत्य भरतनाम्ना वाभिनवमतमेवाददीधरन्। अभिनवविवेचनप्रौढिपुष्ट्योर्नास्ति सन्देहः, किन्त्वस्यापि शक्त्या सह सीमानः सन्ति।

-अभिनवमतस्य महिष्ठा शक्तिस्तावदियम् यद्वृत्तपूर्वसर्वाचार्यसिद्धान्तापेक्षया तस्य दार्शनिकाधारो गम्भीरतमः प्रामाणिकतमश्च। भूयो दार्शनिकवादानामद्वैते पर्यवसानमिव रसविषयकसकलमतानामात्मास्वादकल्पनायामन्र्भावो जातः।

अभिनव एव सर्वप्रथमं रसस्यैकान्तसहृदयनिष्ठाताप्रतिष्ठापकः। भट्टनायकमतेऽपि रसस्य वस्तुपरकसत्ततिरोभावाद् भोग्यत्वमेव स्थितम्। परमभिनवेनेदं प्रथमतया तस्यास्वादरूपता निर्भ्रान्तिशब्दैः प्रणिरूपिता।

रसास्वादस्यानन्दमयत्वमात्रतथ्यस्थापनयशोभाक्तावद् भट्टनायक एव। किन्त्वभिवेन तस्य शैवानन्दवाददृढाधारप्रदानजनितात्यन्तप्रामाणिकत्वं प्रतिपादितम्। येन निरानन्दतादिजैनाचार्यप्रस्तुतयावद्विकल्पवैकल्यं फलितमभूत्।

अद्वैतसिद्धान्तप्रतिपादितानन्दवादाऽऽनन्दवर्धनप्रसाधितव्यञ्जावा- दयोः सहजसमन्वयेनाभिनव एव रसानुभूत्यभिव्यक्तिसंश्लिष्टसिद्धान्तस्थाप कोऽभवत्।

वस्तुतोऽद्वैतव्यञ्जनावादयोः सम्बन्धोऽपरिहार्य एव। सति हि केवलाद्वैततत्वसत्वे विश्वोऽपि विश्ववप्रपञ्चस्तदभिव्यक्तिरेव सिद्धयति न कृतिः। अभिनवस्यैतत्तथ्यसहजसाक्षात्कारवती तत्वदर्शिनी प्रज्ञाऽनुभूत्यभिव्यक्तिसमन्वये रससिद्धान्तान्तरंगबहिरंगयोर्दृढाधारमचीक्लृपत्।

समष्टिगतरसप्रकल्पनाभिनवकृतरसविवेचनैकसिद्धिः। मूलतो व्यक्तिवादि तद्दर्शनम्। तरन्तेनान्ततो रसचक्रपूर्णत्वं सामूहिकरसचेतनया साधितम्। या सामाजिककलानुभूतिस्थापनेदंयुगीनसाम्यवादसमाजवादप्रभाविता दृश्यते, अभिनवेन निजपद्धत्या सा विलक्षणं व्याख्याता, तद्विशदीकरणाय वयमत्र डाक्टरप्रेमस्वरूपगुप्तग्रन्थात्तन्त्रालोकश्लोकोद्धरणोद्धृतिलोभं संवरीतुं न शक्नुमः। सीमा-भारतीयकाव्यशास्त्रे परममाहेश्वराभिनवगुप्तपादाचार्यस्यैकच्छत्रं साम्राज्यमभूत्, अतोऽसौ सर्वविदितसर्वमान्यगौरवस्त्वस्त्येव, सहैव तत्सिद्धान्तसीमानोऽपि नानुल्लेखनीयाः।

अयं दोषस्त्वस्य सुस्पष्टः, यदनेन भरतमतं स्वविचारेण तथातिरञ्जितम्, यथा तत्परवर्तिनि काव्यशास्त्रे वास्तविकं तद्रूपमेव विलुप्तम्। अत्र विकल्पद्वयं सम्भवतिस्वसिद्धान्तपूर्वग्रहहेतुकाभिनवगुप्तकृतभरतविचारायथार्थप्रस्तुतिरित्येकः, स्वपद्धतिविहित भरतमतपुनराख्यानप्रस्तुतिरित्यपरः, अद्वैतवादिकृतसाङ्ख्याद्यभिमतवस्तुपरकस्थापना पुनराख्याप्रस्तुतिवत्। अत्रायमपरो विकल्प एव मान्यतरः प्रतिभाति। तथापि मूलात्मसात्करणपुरस्सरतद्रूपपरिवृत्तेर्वैज्ञानिकविवेचनदृशा काम्यतरत्वं न भवति।

भरतव्याख्यतृष्वपि तथैव व्यवहृतमभिनवेन-वस्तुतो दयनीयतरा तेषां स्थितिः। यथा लोल्लटप्रसंगे दर्शितम्। अतिविरलोद्धरणाधारेणापि तावदिदं सुखमान्यम्, यद्भ भट्टलोल्लटमतं भरतमतेऽतसिन्निहितम्। परमभिनवेनेदं तथ प्रस्तुतम्, यथा सर्वथैव तदग्राह्यं संवृत्तम्। श्रीशङ्कुकविवेचनान्तर्गतकलाविषकानेके महर्घसंकेता अपि भट्टतोतसहकृताभिनवेन दर्शनक्षेत्रे तथा निपातिताः, यथा तद्गुणाः अपि भूमिसात्कृताः। विश्लेषणेन भट्टनायकसिद्धान्ता अतिपुष्टगम्भीराधारभूमिस्थिताः, काव्यचिन्ततविकासवितरिताभूतपूर्वसहयोगः, स्वयमभिनवेन यथावदंगीकृताधारभूतसिद्धान्तविशेषा अपि तथा निराकृताः, यथा वर्षसहस्रं भट्टनायकमहत्वनगण्यतैवागण्यत।

अयमपरो दोषोऽभिनवसिद्धान्तस्य यत्काव्यास्वादात्मास्वादयोर्भेदापगमो नाम, प्रायेणाग्राह्य एव बुद्धया। अतएव काव्यास्वादे रसे वाऽलौकितकत्वगहनरागरञ्जनातथाऽभवत् यथाधुनिकयुगविचारकगणावहेलनीयतां गतश्चिरं रससिद्धान्तः।

एकान्तात्मपरकतायां रसस्वरूपस्य स्वीकृतायां, सहृदयतायामेव सर्व बलमाधीयते। काव्यास्तित्वं चोपसर्जनीभवति। अभिनवेन तु कवेरात्मतत्वमाधृत्य काव्यस्याप्यात्मपरकत्वं व्याख्यातं, परमग्रेसरता तेन व्याख्यानेनेयमात्मपरकता प्रायेणोपेक्षिताऽभूत्, सन्तुलनञ्च व्यक्रियत। आत्यन्तिकतया रसस्य व्यक्तिनिष्ठसत्तकत्वं स्वीकार्यमेव, परं व्यक्तिपरवाच्येषु कविरप्यन्तर्भावनीयः स्यात्, केवलस्य सहृदयस्य तद्वाच्यत्वे काव्यमूल्यांकनपद्धतिः सर्वथैवास्ता व्यस्ता च स्यात्।

यादृशीयमभिनवप्रतिभायाः प्रखरता पारदर्शिता च, तदपेक्षया निविडतरा प्रायो वागाडम्बराक्रान्ता तत्पद्धतिः। आनन्दवर्धनवामनादिसाम्ये वैषम्यमिदं सुतरां विशदीभवति। ध्वन्यालोकवृत्तिविवरणेष्वभिनवगुप्तमेधा यावदेकतो दार्शनिकतत्वसहकृतसूक्ष्मगहनविश्लेषणप्रस्तोत्री दृश्यते तावदपरतोऽभिनवपद्धतिनिविडता सामान्यतथ्यान्यपि दुर्गमयन्ती प्रतीयते। कुन्तकविषयेऽपीदमेव सत्यम्। परं पण्डितराजोऽत्र प्रतिदृष्टान्तः, गम्भीरगम्भीरतरदार्शनिकतथ्यविवेचनेष्वमपि हि तत्पद्धतिर्निर्विडभावमनोहरा। क्वचित्क्वचिद्या काचिद् दुरूहता प्रतिभाति, सा नैयायिकमतसूक्ष्मत्वप्रयुक्ता, न त्वभिव्यक्तिमूलेति। अनन्तरप्रवृत्तिषु प्रायोऽभिनवमतमेव सर्वमान्यतामशिश्रियत् परवर्तिन आचार्या मूलतत्वं यथावदुर्रयकुर्वन्। केन केनापि एकद्वेषु स्थलेषु न्यूनाधिकः शास्त्रीयभेदः प्रकाशितः। यथा. धनञ्जयधनिकाभ्यां रसस्थितेः, सहृदयगतत्वंप्रतिपन्नम्- 'सहृदयगत एव स्थायिभावो रसत्वमेतीति'।

क्रीडतां मृण्मयैर्यद्वद् बालानां द्विरदादिभिः ।<br>
स्वोत्साहः स्वदते तद्वच्छोतॄणामर्जुनादिभिः ।।इति।।<br>
विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः ।<br>
आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः।।इति च।।

व्यञ्जनावृत्तिस्वीकारपराङ्मुखतया तु तौ काव्यतदुपवर्णितविभावादिभिः सह रसस्याभिनवप्रतिपादितव्यङ्ग्यव्यञ्जकभावसम्बन्धापेक्षया भट्टनायकाभिमतं भाव्यभावकभावसम्बन्धमेवाभिमन्येते—'अतो न रसादीनां काव्येन सह व्यङ्ग्यव्यञ्जकभावः। किं तर्हि भाव्यभावकसम्बन्धः। काव्यं हि भावकं भाव्या रसादयः' इति। ततस्तन्मते भाव्यभावकसम्बन्धः संयोगपदार्थः, भावितत्वं भावितिर्वा निष्पत्तिपदार्थः। इदमेव वस्तुतो भट्टनायकस्यास्ति सम्मतम्।

महिमभट्टो रसं काव्यात्मानं मन्यते। 'काव्यस्यात्मनि संज्ञिनि रसादिरूपे न कस्यचिद् विमतिः' इति तेनेदमपि स्वीकृतं यथा रसस्थितिः सहृदयगतेति। स एव स्थायिभावं रसरूपेणास्वादयति, परममी स्थायिभावा वास्तविकाश्चित्ते वासनात्मतया विद्यमाना वा न भवन्ति, प्रत्युत रंगे नटप्रदर्शितानां तेषां प्रतिबिम्बकल्पाभवन्ति—

'तैरेव कारणादिभिः कृत्रिमैर्विभावाद्यभिधानैरसन्त एव रत्यादयः प्रतिबिम्बकल्पाः स्थायिभावव्यपदेशभाजः कविभिः प्रतिपत्तृप्रतीतिपथमुपनीयमाना हृदयसंवादादास्वाद्यतामुपयन्तः सन्तो रसा इत्युच्यन्ते।'12

परमस्याः प्रक्रियाया आधारोऽनुमितिरेव न व्यञ्जना। अनुमित्यैव सिद्ध्यन्ति रसाः। विभावादयोऽत्र गमकाः, अन्ते रसरूपतामापद्यमानः स्थायिभावश्च गम्य—

'त एव हि लौकिका विभावादयो हेतुकार्यसहकारिरूपा गमकाः। त एव च रत्यादयोऽवस्थाविशेषरूपा भावा गम्याः।' इति।

अतोमहिमभट्टमतेऽनुमितिर्निष्पत्तिपदार्थः, अनुमाप्यानुमापकसम्बन्धश्च संयोगपदार्थः। इत्थं रसस्वरूपविषये महिमभट्टस्य मतमभिनवानुकूलम्, परं प्रक्रियाविषये श्रीशङ्कुकानुरूपमिति।

मम्मटश्चैतत्तर्कसमाधानपुरस्सरमभिनवगुप्तमतमेव पुनः प्रत्यतिष्ठिपत्। काव्यशास्त्रप्रणयनमेव मम्मटस्य स्पष्टतयेष्टमासीत, अतस्तद्दृष्टिः काव्यविवेचनमात्रकेन्द्रिताऽतिष्ठत्। दर्शनमप्यनेन यथास्थानमुपयोजितम्, परं न तत्सूक्ष्मतासु क्वचित्प्रतिनिविष्टम्। अतस्तद्ग्रन्थे कश्चिदपि मौलिकः सीपनाविशेषो नेक्ष्यते। स स्वशैल्या स्वच्छतया संक्षिप्ततया च दार्शनिकजटिलताभ्योऽपसृत्याभिनवमतोद्योते रसनिष्पत्ते राख्यानमात्रं कृतवान्। एतेन संयोगपदस्य स एव व्यङ्ग्यव्यञ्जकभावो निष्पत्तिपदस्यापि स एवाभिव्यक्तिरूपोऽर्थो निरूपितः। मम्मटाभिनवयोस्तावदयं भेदो यन्मम्मटेन लोल्लटादीनां वृत्तपूर्वाणामाचार्याणां मतान्यपि सहृदयपरकतयैव प्रस्तुतानि।

मम्मटग्रन्थस्तथा लोकप्रियतां गतो यथाभिनवस्य मूलसिद्धान्ता अपि तेनाच्छादिताः, क्रमशश्च रसप्रसंगः स्वाधारभूताच्छैवाद्वैतदर्शनाद्विच्छिन्नः। अपि चात्र भारते शांकरवेदान्तः प्रचारप्रसारसरणौ वर्धमानः साहित्यं साहित्यशास्त्रञ्च प्रभावयन्नभूत्। ततो रससिद्धान्ते शैवाद्वैतप्रभावस्यापकर्षः शांकराद्वैतप्रभावस्य चोत्कर्षः प्रावर्तत। एतत्परिवर्तनसंकेता अंशतो विश्वनाथेऽपि प्राप्यन्ते यद्यपि दार्शनिकत्वाद् विश्वनाथे साहित्यरसिकत्वमतिरिच्यते स्म। चरमा परिणतिस्तु पण्डितराजे जगन्नाथे लभ्यते येनाभिनवस्य रससिद्धान्तो नव्यन्यायपरिपुष्टे शांकरवेदान्ते सर्वथा न्यमज्जयत। विश्वनाथोऽभिनवस्वरेणैवाह—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायिभावः सचेतसाम्'।।इति।

परं व्यक्तपदं -'दुग्धस्य दध्यादिरूपे परिणतिसमकक्षतयैव व्याख्यातम्, न दीपाद्र्घटप्रकाशसादृश्येन। तथैव पूर्वस्थितो रसोऽभिव्यज्येतेति कथनमपि निष्पत्तेः परिणतिरूपमेवार्थं मन्यते विश्वनाथ इत्यभिप्रायकम्। यद्यपि

व्यक्त्यभिव्यक्तिपदयोः प्रयोगं स पुनः पुनरावर्तयति, अभिनवोद्धरणेनैव च स्वमन्तव्यं पोषयति—

तदुक्तं लोचनकारैः 'रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद् व्यवहार' इति।

ततश्च विश्वनाथो रससवरूपमुपवर्णयति रसास्वादप्रकारगर्भम्—

'सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः ।इति।।14

भट्टनायकस्यैवेयं शब्दावलीतिवक्तुं नापेक्ष्यते । तथाहि–

'सत्वोद्रेकस्वप्रकाशानन्दमय.............परब्रह्मास्वादसविधेन भोगेन परं भुज्यते।'

यत्राभिनवमत प्रकाशे संशोधनानि विहितानि। सत्वोद्रेकपदव्याख्याने, स्वाकारवदिति, अभिन्ने इति च पदयोस्तानि संशोधनानि निहितानि। भट्टनायको रसस्थितौरजस्तमसोरनुबन्ध मन्यते, विश्वनाथस्तु 'रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहृवोच्यते।' इइति तयोरननुबन्धमपेक्षते। एवमेव रसास्वाद आत्मस्वरूपास्वादादभिन्नः, रसास्वादः खल्वात्मास्वादस्यैव रूपान्तरमिति। एतत् संशोधनद्वयमभिनवमतानुकूलतयैव कृतमित्यसंशयम्। अपरोऽप्यस्ति स्फुटो भेदः – चमत्कारपरस्य विस्मयार्थत्वं विश्वनाथस्याभिमतम्। यदनधिकृतम्, पूर्वग्रहपरिणाममात्रम्। विश्वनाथोऽभिनवस्य शैवीं शब्दावलीमेकान्ततः पर्यहरत् (डाक्टरप्रेमस्वरूपगुप्तोक्तस्तस्य तथा साक्षात्परिचयाभावोऽपि सम्भाव्यते ) सामान्याञ्च वेदान्तिकीं शब्दावलीमेव प्रायुङ्क्त ।

रसप्रसंगेऽन्तिमं सुविश्रुतं नाम पण्डितराजजगन्नाथस्य श्रूयते। पण्डितरोजो रसगंगाधरे रसविषयकाण्येकादशं मतान्युदलिखत्, व्यविवेचच्च। तदीयविवेचनया विशदीभवति यदभिनवगुप्तमतं स पूर्णतयाऽऽस्थितः। अभिनवस्य रससिद्धान्तोऽद्वैत माश्रितः परमिदं प्रत्यभिज्ञादर्शनप्रदर्शितं शैवाद्वैतम्, यदात्मतत्वेन सह तदाभासरूपां प्रकृतिमपि सत्यामानन्दमयीञ्ज मन्यते। पण्डितराजेनाभिनवस्याद्वैतं तत्परिणामिनमानन्दसिद्धान्तञ्च यथावद् गृहणतापि शांकरवेदान्तरागेण तदुभयं रञ्जितम्। इदमन्तरन्तेन स्वयं महता शब्देन प्रकाशितम्—

'इत्थञ्चाभिनवगुप्तमम्मटभट्टादिग्रन्थस्वारस्येन भग्नावरणचिद्विष्टो रत्यादिः स्थायी भावो रस इति स्थितम्। वस्तुतस्तु वक्ष्यमाणश्रुतिस्वादस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः ।' इति।

यावान् रसस्वरूपसम्बन्धस्तावति नोभयोः किमप्यन्तरम्। उभयत्रापि रसस्य नित्यत्वं स्वप्रकाशत्वञ्च सिद्धम्। अन्तरं तावदेतावदेव यदभिनवमते चैतन्यं विशेषणं चैतन्यञ्च विशेष्यमिति। तदमेव च शैवाद्वैतशांकराद्वैतयारन्तरम्। शैवाद्वैते प्रकृत्यंशेषु रत्यादि स्थायिभावोष्वपि चैतन्यप्रतिभाससद्भावादानन्दस्थितिर्मान्या भवति। किन्तु शुद्धशांकराद्वैतसिद्धान्ते केवलं चैतन्यमेवानन्दमयं मन्यते। इत्थं पण्डितराजेनाभिनवमतं तत्वतः स्वीकृत्यापि तद्व्याख्याने वेदान्तानुसारेणैव संशोधनं विहितम्।

अभिनवमतातिरिक्ते मतान्तरे अपि भवतः। नव्यमते त्वप्रति पण्डितरास्यास्था स्फुटैव। यद्यपि नास्ति तेनैवं क्वचिदपि संकेतितम्, तथापि येनाग्रहेण तेनैतन्मतं समर्थितम् तेन विद्वद्भिरयं निष्कर्षः प्रकाश्यते, यदेते नव्यमते तयोरपि विशेषतः प्रथमं पण्डितराजस्यैव स्वमतमस्तीति। तच्चत्थम्—

'काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यञ्जनव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना, मल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयक रत्यादिरेव रसः।' इति।

अयमस्य सारांशः—

1. स्थायिभाव एव रसरूपेणास्वाद्यते।

2. व्यञ्जनाव्यापारसहायूयेन सहृदयस्य विभावादिभिः स्थायिभावावगतिर्भवति।

इमे तथ्ये तावदभिनवमतानुकूले एव।

एकतः काव्यगुणानामपरतश्रूव तस्य (सहृदयस्य) स्वहृदयगुणानां कारणेन स्मतृचित्ते भावनारूपो दोषविशेषः प्रादुर्भवति, यस्य प्रभावेण तदात्मा कल्पितदुष्यन्तवेनाच्छाद्यते? आश्रयेण सह तस्य तादात्म्यं भवतीत्यर्थः। अत्र द्वे नूतने तथ्ये समक्षमेतः भावनारूपदोषकल्पना, आश्रायेण सह तादात्म्यञ्चेति।

भावनारूपदोषकल्पाधारोऽस्ति नव्यन्यायपुष्टो वेदान्तः। आत्मनि दुष्यन्तत्वाभिमानभावना वस्तुतो न वास्तविकी, अत एवेयं दोषं इति कथ्यते। इयं भावना वस्तुतः आधुनिकालोचनाशास्त्रस्य समानुभूतेः सन्निहितास्ति, यस्यां कल्पनानुभूत्योरुभयोरपि संयोगो भवति। अस्याः केवलकल्तेतयाख्यानमपर्याप्तं स्यात् अस्या ह्याधारो भावः। मनोविज्ञानानुसारेणायं यथार्थो न भ्रमः। किन्तु मायावादी शांकरवेदान्तस्तु केवलामात्मानुभूतिमेव यथार्था मन्यते, वस्तुत आत्मानमेव सत्यं मन्यते,

नानुभूतिमपि। तदनुसारेण प्रत्यक्षजागतिकानुभूतावपि परमार्थतो भ्रमरूपायां कल्पितरत्याद्यनुभूतेरयथार्थतायां कः सन्देहः। नव्यमतानुसारेण काव्यानुभवः कल्पितभावानुभवः, योऽविद्यमानतयाऽसन्नप्यनुभूयमानतया सन् भवति। अत एव चानिर्वचनीयः स्वप्रामाण्येन च सुखमयः। वास्तविक्यनुभूतिः काव्यानुभूतिश्चेत्युभे अप्येतद्दर्शनेनाज्ञानरूपे स्तः। भेदः केवलामात्राकृतः। अन्यत्र ह्यज्ञानावरणमंशतो निवर्तते। असंशयं दर्शनं समलविद्याधारः, तत्रापि सर्वातिशायितया शांकरवेदान्तः सूक्ष्मो गहनो बुद्धिसम्मतश्च। केवलबुद्ध्याश्रयेण साहित्यस्य साहित्यशास्त्रस्य च कीदृशी दुर्गतिर्भवतीत्यत्र प्रमाणमस्ति पण्डितराजसदृश्य रसज्ञस्येदं दार्शनिकरसविवेचनम्। यत्कथमपि सहृययहृदयं परितोषयितुं नार्हति।

एतयोरुभयोर्व्याख्ययोधारेण द्वौ निष्पत्तिपदार्थौ समक्षमेतः प्रथमस्तावदभिनवमम्मटप्रतिपादिताभिव्यक्तिर्व्यक्तिर्वा। व्यक्तिपदार्थश्च पण्डितराजानुसारेण न व्यञ्जना, अपि त्वावरणमुक्तस्य चैतन्यस्य प्रकाशनम्–'व्यक्तिश्च भग्नावरणा चित्' इति। स्थायिभावेऽस्य शुद्धचैतन्यस्य विषतयां गते रसो निष्पद्यते। इत्थञ्चावरणमुक्तशुद्धचैतन्यविषयीभावो निष्पत्तिपदार्थः।तात्विक्या शब्दावल्या, पण्डितराजस्य वेदान्तानुगतमन्तव्यानुसारेण–'भावमाधमेन शुद्धचैतन्यप्रकाशनम्' इति। अयमर्थः सामान्यकाव्यशास्त्रीयार्थेभ्यो भिन्नः शुद्धदार्शनिकभूमिकाप्रतिष्ठित इति न वचनापेक्षम्। नव्यमताधारेण रसनिष्पत्तिक्रियाया अंगद्वयम्– व्यञ्जनाव्यापारेण विभावादिभिरालम्बनं प्रत्याश्रयगतस्य स्थायिभावस्य ज्ञानम्' दुष्यन्तः शकुन्तलादिविषयक रतिमानित्याकारकं प्रथमम्। भावनादोषोदयकल्पितदुष्यन्तत्वाच्छादितेन सहृदयस्यात्मना काव्यगुणादिवशांदशत आवरणमुक्तेन शकुन्तलाविषयकरतेरास्वादनं द्वितीयम्। इत्थं व्यञ्जनया प्रथममाश्रयगतः स्थायिभावो व्यज्यते ततस्तदात्मभूतेन सहृदयस्यात्मनास्वादितोऽसौ रसरूपे परिणमति। अत्रापि मौलिके निष्पत्तिपदार्थे न कश्चन भेदः। अत्राप्यसौ व्यक्तेरेव वाचकः, व्यक्तिश्च चिच्छक्तिविषयीभावः। केवलं प्रक्रियाया दार्शनिक्यां व्याख्यायां भेदो जातः।

पण्डितराजात्परं प्रायो मौलिकं चिन्तनमस्तमितम्। उत्तरस्यां रसविवेचनपरम्परा हिन्दीभाषाया रीतिकालिकाचार्याणां हस्ते निपतिता, ये शताब्दीर्मूलं विहाय शाखाप्रशाखानां वर्णने विवेचने च समलगन्। पूर्वपश्चिमदक्षिणप्रयोज्यासु भाषासु प्रायः संस्कृतानुवादा, एवाभवन्, तेऽपि सङ्ख्यया न्यूनतराः। आधुनिके युगे विशेषाद्वर्तमानशताब्द्या द्वितीयचरणे पञ्चविंशत्युत्तैकोनविंशशताब्द्या अद्यावधि विशेषान्माहाराष्ट्र्यां हिन्दीभाषायाञ्च शास्त्रीयपरम्परायाः पुनरुत्थानमभूत्। प्राचीनसिद्धान्तानां

विशेदान्याख्यानानि पुनराख्यानानि च प्रास्तूयन्त, रससिद्धान्तस्य विभिन्नेषु पक्षेषु–रसस्वरूपरसनिष्पत्तयादिषु प्राचीनार्वाचीनज्ञानप्रकाशे गम्भीरा विचारा विनिमिता, विनिमीयन्ते च।

रसनिष्पत्तेः सारचित्रम्

परम्परागतम्

| आचार्यः | आधारभूतंदर्शनम् | निष्पत्तिपदार्थः | संयोगपदार्थश्च |
|---|---|---|---|
| भट्टलोल्लटः | मामासादर्शनम् | उत्पत्तिः | उत्पाद्योत्पादक. भावसम्बन्धः |
| श्रीशङ्कुकः | न्यायदर्शनम् | अनुमितिः | अनुमाप्यानुमापक भावसम्बन्धः |
| भट्टनायकः | साङ्ख्यदर्शनम् | भुक्तिः | भोज्यभोजक.. भावसम्बन्धः |
| अभिनवगुप्तः | वेदान्तदर्शनम् | अभिव्यक्तिः | व्यङ्ग्यव्यञ्जक.. भावसम्बन्धः |

संशोधितम्

| | | | |
|---|---|---|---|
| भट्टलोल्लटः | | अपचितिः | उपचेयोपचाकभाव. सम्बन्धः |
| श्रीशङ्कुकः | बौद्धन्यायः | अनुकृतिः | अनुकार्यानुकारक भावसम्बन्धः |
| | सहृदयदृष्ट्या तु, | अनुमितिः | अनुमाप्यानुमापक भावसम्बन्धः |
| भट्टनायकः | शैवद्वैतवादमीमां. सयो रन्यततम् | भावितिः | भाव्यभावकभाव. सम्बन्धः |
| अभिनवगुप्तः | शैवाद्वैतवादः | अभिव्यक्तिः | व्यङ्ग्यकव्यञ्जक भावसम्बन्धः |

नाट्यमेव रसस्थानमाहादौ भरतो मुनिः।

इह रसस्थाननिर्णयो रसनिष्पत्तिविवेचनांगम्। प्रतयाचार्यमतव्याख्यानान्तर्गततया चास्य प्रसंगस्य यथास्थानमुल्लेखोऽप्यक्रियत। तथापि पृथग्विवेचनेन स्थितिः कदाचित्स्फुटतरा जायेत। भरतो नाट्यमेव रसस्थानमाह-रंगे स्थायिना सह विभावानुभावव्यभिचारिसंयोगात्-विभावानुभावव्यभिचारिभावैः संयुक्तस्य स्थायिभावस्य वा सफलप्रदर्शनात्कुशलोपस्थापनाद्वा रसनिष्पत्तिर्भवतीति। भरतमेन रसः खलु नाट्योपकरणैः रंगे प्रस्तुता भावमूलककलात्मिका स्थितिरेका। रससत्त विषयगता, तस्याः स्थानञ्च नाट्यमित्याशयः।

साक्षाच्छब्दाभिधाने रंगमञ्च एवास्ति, यत्रैषा स्थितिर्घटते। रसः किलास्वाद्यः, न त्वास्वादः। तस्य सीरनं सहृदयहृदयम्, तत्तु तदास्वादनेन हर्षादिननुभवति। इत्थं भरतमेन रसस्थानं नाट्यम्, रंगो वा-'अष्टौ नाट्ये रसाः स्मृताः। इति। तज्जन्यानां हर्षादीनां सीरनं तु सहृदहृदयम्।

भरततात्परं संस्कृताचार्याणां ध्यानं नाट्याादपसृत्य काव्ये केन्द्रितमभूत्। अलंकारवादिभी रसोऽलंकारेष्वन्तर्भावितिः। रसस्य परिभाषा तु सैव स्थिता विभावानुभावसंचारिभावपुष्टस्य स्थायिभावस्यैव रससंज्ञा प्रादीयत। परं परमस्वतन्त्रसत्ताकोऽयं रसो रसवदलंकारपोषकं तत्वमभूत्। रसयुक्तोऽलंकारो रसवदलंकार इति व्युत्पत्तेः। एतन्मतानुसारेण रसस्थितिरलंकारविशेषगोचरा, अलंकारश्च मूलतः शब्दार्थयोर्धर्मः। अतो रसस्थितिरपि शब्दार्थयोरेव, इमौ शब्दाथविव च काव्यम्:-'शब्दार्थौ काव्यम्' इत्युक्तेः। इत्थं भामहदण्डिप्रभृतिभिरलंकारवादिभिः काव्यमेव रसस्थानमिति साधितम्। सहृदयस्तदास्वादनेन प्रीतिमानन्दं वा विन्दति- 'करोति कीर्तिं प्रीतिं च साधुकाव्य निषेवणम् इति। 'रसस्य स्थानं काव्यम्, प्रीतेः स्थानं तु सहृदयहृदयम्' इति निष्कर्षः।

रसवादिन्यपि धाराजस्रं प्रावहत्। तत्र च लोल्लटशङ्कुकादिभिर्भरतपरम्परा विकासिता। लोल्लटेनानुकार्यस्य रसस्थानत्वं प्रतिपादितम्। यद्यप्यनुकार्यविषये तत्र कश्चन सन्देहोऽपि सम्भवति, तथापि पूर्वापरपर्यालोचनया विशदीभवति, यल्लोल्लटस्यानुकार्यतया मूलकथापात्रमेवाभिमतं न कविनिबद्धम्। तन्मतेन रामादिमूलपात्राण्येव मुख्यतया रसमास्वादयन्ति, गौणतवेन च नटोऽपि स्वस्मिन् रामाद्यभिमानेन तमास्वादयति। सहृदयो रसं नानुभवति, अपितु चमत्कारमात्रम्। अर्थात् तादृशीं रसस्थितिं साक्षात्कृत्य स चमत्कृतो भवति। अतो मूलपात्रचित्तमेव वास्तविकं रसस्थानम् गौणरूपेण रूपारोपकारणाद्वा नटचित्तमपि, तज्जन्यचमत्कारस्य-कलात्मक प्रतीतेर्वा स्थानं तु सहृदयहृदयम्।

श्रीशङ्कुको भट्टलौल्लटस्येमामव्यवहारिकीं स्थापनां निराकरोत्। रामादिमूल पात्राणामभावे जाते तदनुभूतस्य रसस्य सम्प्रति सत्त कथं सम्भवतीति अतो मूलपात्र चित्तं रसस्थानमिति कल्पना जल्पनामात्रम्, शङ्कुकोऽनुकृतं स्थायिभावमेव रसं मन्यते। स्वकौशलाभ्यासाभ्यां सीाय्यनुकरणे कृतार्थस्य नटस्याभिनयं पश्यन् सहृदयोऽनुकार्यगतं स्थायिभावमनुमिनोति, सा रसानुमितिरेव रसनिष्पत्तिः। इत्थं नटः स्थाय्यनुकर्तृत्वाद्रसस्य कर्ता, न तवास्व दयितानुभविता वा। अतो नटकार्यमभिनय एव वा रसस्थानम्, तत्सम्बन्धेन नटोऽपि रसस्थानं भवति, न तु नटचित्तम्। इत्थं शङ्कुकोलोल्लटं निराकृत्य पुनरपि भरतं सन्निधतो,

भरतेनापि हि नाट्यमेव रसस्थानम् स्थापितम् 'भवेदभिनयो नाट्यम्' इति। अस्ति भरतशङ्कुकयोर्बलाबलभेदः। शङ्कुकोऽभिनये बलमाधत्ते भरतस्तु सम्पूर्णप्रक्रियायाम्- अर्थात् स कविनटकर्मणोः यामेव रसस्थानं मन्यते, अभिनयस्तु तस्याः किञ्चिदंगमात्रम्। शङ्कुकमते सहृदयः स्वरागात्मकसंस्कारोपहितेन नटकौशलेन रससयानुमानं करोति, अत्रापि, रसो विषयगतः, अत एवास्वाद्यः। परमनुमानशब्दस्तथ्यमिदमभिव्यक्ति यत्सहृदयो रसस्य केवलपदार्थतया भोगं न करोति अनुमानविषयतया त्वनया रससत्ता विषयिगतेव भवति। अत्रायं निष्कर्षः-श्रीशङ्कुकमतेन रसस्थानं नटोऽनुकर्ता तदभिनयो वा। सहृदयहृदयन्तु रसानुमितेस्तज्जन्यप्रतिक्रियायाश्च -रागात्मककलात्मकप्रतीतिरूपाया एव स्थानम्।

भट्टनायकानुसारेण साधारणीकृतिविभावादिभावितः सहृदयस्य स्थायिभावो रसः सम्पद्यते। एतस्यायमाशयो यत् सहृदयहृदयं रसस्थानमिति। पर भट्टनायको रसे रसभोगे च भेदं करोति। काव्यस्य भावकत्वव्यापारेण व्यक्तिगतसंसर्गनिर्मुक्तिं सहृदयहृदयं रजस्तमसोर्मन्दीभावे सत्वप्रधानं भवति। तत्र तस्य स्थायिभावः सामान्यैन्द्रियविकारमुक्तः सन् रसे परिणमति। अस्याः प्रक्रियायाः परिणतिर्भवति काचिदानन्दमय्यात्मविश्रान्तिः। या भट्टनायकेन काव्यस्य भोजकत्वव्यापारेण सिद्धा भुक्तिरिति भोग इति वोक्ता। इत्थमत्रमते रसस्य स्थानं सहृदयहृदयं सिद्ध्यति। सूक्ष्मेक्षिकया तु रसभोगस्य रसास्वादस्य वा सीानं सहृदयस्य चिदेव विज्ञायते।

अन्तेऽभिनवमतलोचनीयम्। अत्र रसो नास्वाद्यः, अपि त्वास्वाद एव सः । व्यावहारिकया तु दृशा स आस्वाद्योऽप्युच्यते। अत्र चात्मानन्दो नाम रसपदार्थः, न शुद्धात्मानन्दः। रत्यादिविशिष्टत्वेन ह्यसौ सोपाधिकः अस्यात्मानन्दस्य रसस्य वा सीानं नूनं सहृदयस्य चिदेव आत्मैव वा। अभिनवो भरते श्रद्धावान्। विरोधिमत् खण्डनायानेकतर्कोद्धरणानन्तरं तेनैष तर्को दत्तः, यदियं स्थापना भरतमुनिमतविरूद्धेतिस्वतोऽसिद्धा। परमिदमपि पश्यामः, यथा तेन भरतमतं स्वयं सर्वथा विपर्यासितम्। अस्य वैषम्यस्येदं समाधानम्- यद्भरतस्य रसविवेचनं व्यावहारिकम्, अभिनवस्य तु तात्विकम्। व्यवहारगतानां तथ्यानां पदार्थानां वाख्यानमद्वैतदर्शनेऽनयैव दिशा क्रियते यथाभिनवेन भरतमतस्य। अतोऽभिनवश्रद्धा नाश्रद्धेया। स भरतमतमविरूध्य केवलं तात्विकमाख्यानं प्रास्तौत्। वेदान्तिकः पण्डितराजस्त्वेकं पदं ततोऽप्यग्रे निर्गतः। शांकरवेदान्ते विषयास्तित्वं सर्वथैवाग्राह्यं भवति। अतस्तस्य 'भग्नावरणचिद्विशिष्टो रत्यादि'-रित्यज्ञानरूपावरणमुक्तस्य शुद्धचैतन्यस्य विषयगतो रत्यादिस्थायिभाव एव रस इति मतमपि न स्वीकार्यम्। तस्य निर्भ्रान्तमिदं मतं यथाऽऽनन्दपर्यायो रसस्तत्वतो न स्थायिभावात्मकः, स तु शुद्धः

आत्मरूप एव भवति। अत एव सोऽभिनवमतं संशोधयति-'रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रस इति, अर्थाद् रत्यादिस्थायिभावविशिष्टमावरणमुक्तं शुद्धं चैतन्यमेव रस इति। श्रुतिप्रमाणम् 'रसो वै सः' इत्यपि तथैव सिद्ध्यति नान्यथा।

भारतीयरसशास्त्रस्येदं विवेच तत्गम्भीरम् । तत्वदृष्ट्या च कदाचित्सर्वांगपरिपूर्णम्। परं दार्शनिकीषु सूक्ष्मप्रतिपत्तिषु प्रतिनिविश्याधुनिककाव्यमर्मज्ञानां काव्यशास्त्रविद्यार्थिनाम् वा सुदुर्बोधतां गतम् । उपर्युक्तविवेचनाधारेण वर्तमानालोचनाशास्त्रस्य शब्दावल्या भारतीयकाव्यशास्त्रस्य रसविषयकधारणानामयं निर्गच्छति।

# संदर्भग्रंथाः-----


1-नाटयूशास्त्रः काव्यमाला 1943 पृष्ठ-93
2-काव्यप्रकाशः चतुर्थउल्लास

3-हिन्दीकाव्यप्रकाशः डा0सत्यव्रतसिंह पृष्ठ-68
4-कम्परेटिव एस्थेटिक्स भाग-1 डा0कान्तिचन्द्रपाण्डेय पृष्ठ-30
5-काव्यप्रकाशः वामनझलकीकर पृष्ठ-225
6-हिस्टी आफ संस्कृतपोयटिक्स, पी.वी.काने पृष्ठ-46
7-काव्यप्रकाश टीका पृष्ठ-101
8-हिस्टी आफ इण्डियनएस्थेटिक्स : पृष्ठ-28
9-रससिद्धान्त का दार्शनिक तथा नैतिकविवेचनः डा0 तारकनाथबाली
10-काव्यप्रकाश आचार्यविश्वेसर टीका पृष्ठ-106,107
11-दशरूपक :: 4:41:42
12-व्यक्तिविवेक : महिमभट्ट पृष्ठ-79
13-तंत्रालोक : 10:5:85
14-साहित्यदर्पण तृतीयपरिच्छेद